Prajnaparamitas. Satasahastrika
Satasahastrika prajnaparamita


XVII

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO. 1330.

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ:

A
THEOLOGICAL AND PHILOSOPHICAL DISCOURSE
OF
BUDDHA WITH HIS DISCIPLES
(IN A HUNDRED-THOUSAND STANZAS).



EDITED BY
PRATĀPACANDRA GHOṢA

PART I. FAS. XVII.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1912.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.*,
AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

		Rs.	
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	...	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	...	14	6
Aitareyalocana	...	2	0
Amarakosha, Fasc. I	...	2	0
*Anu Bhāshya, Fasc. 2-5 @ /10/ each	...	2	8
Anumana Didhiti Prasarini, Fasc. I, @ /10/	...	0	10
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	...	3	12
Ātmatattvaviveka, Fasc. I	...	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	...	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-9. Vol. II, Fasc. 1-9 @ 1/ each	...	18	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each	...	1	14
Baudhāyana Srauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-4 @ /10/ each		4	6
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1, @ /10/ each	...	4	6
Banddhastotrasangraha	...	2	0
Brhaddevatā, Fasc. 1-4 @ /10/ each	...	2	8
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each	...	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	...	3	2
Cri Cantinatha Charita, Fasc. 1-3	...	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	...	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	...	8	0
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-4 @ /10/ each	...	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	...	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	...	3	2
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-16 @ /10/ each	...	10	0
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each		36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each	...	2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/	...	1	4
Çlokavartika, (English), Fasc. 1-7 @ 1/4/ each	...	8	12
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each	...	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	...	1	14
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	...	1	4
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1-7 @ /10/ each	...	4	6
Ditto Ācārasāra, Vol. II, Fasc. 1-4	...	3	2
Gobhilīya Gṛhya Sūtra, Vol. I, @ /10/ each	...	3	2
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each	...	2	8
Ditto (Appendix) Gobhila Parisista	...	2	0
Ditto Grihya Sangraha	...	0	10
Haralata	...	1	14
Karmapradiph, Fasc. 1	...	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	...	4	6
Kātantra, Fasc. 1-6 @ /12/ each	...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	...	17	8
Kurma Purana, Fasc. 1—9 @ /10/ each	...	5	10
Kiranavali, Fasc. I, @ /10/	...	0	10
Madana Pārijāta, Fasc 1-11 @ /10/ each	...	6	14
Mahā-bhāsya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each	...	19	6
Ditto Vol. IV, Fasc. 1-2 @ 1/4 each	...	2	8
Manutīkā Saṅgraha, Fasc. 1-3 @ /10/ each	...	1	14
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	...	9	0
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each	...	6	4
Mugdhabodha Vyakarana, Fasc 1-2, @ /10/ each	...	1	4
Nirukta, (2nd edition) Vol. I, Fasc. I @ Rs. 1-4	...	1	4

लोकमभिभूयनिर्याति। स चेत् सुभूते कायस्तथाऽभविष्यदवितथा-ऽनन्यतथाऽविपरीताभूतः सत्या यथावन्नित्याध्रुवः शाश्वतोऽविपरि-णाम धर्म्मा खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। तस्मात्तर्हि सुभूते कायः कल्पितो विठयितः सन्दर्भितः। इदं सर्व्वमनित्यमध्रुवमशाश्वतं विपरिणाम-धर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते मनस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावो-ऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। तस्मात्तर्हि सुभूते मनः कल्पितं विठयितं सन्दर्भितमिदं सर्व्वम-नित्यध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते रूपन्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमपरिणामधर्म्म न खल्वभावो-ऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते रूप कल्पितं विठयितं सन्दर्भितमिदं सर्व्व-मनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते शब्दस्तथा-ऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतः सत्यः यथावन्नित्याध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्तेदं महायानं सदेव-मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते शब्दः कल्पितो विठयितः सन्दर्भितः इदं सर्व्वमनित्यमध्रुवमशाश्वतं

विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभि-
भूयनिर्याति। स चेत् सुभूते गन्धस्तथाऽभविष्यदवितथाऽनन्यतथा-
ऽविपरीतो भूतः सत्यः यथावन्नित्योध्रुवः शाश्वतोऽविपरिणामधर्म्मा
खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूय-
निरयास्यत्। यस्मात्तर्हि सुभूते गन्धः कल्पितो विठपितः सन्द-
र्भितोऽनित्योऽध्रुवाऽशाश्वतो विपरिणामधर्म्माभावस्तस्मान्महायानं
सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते रसस्तथा-
ऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्योध्रुवः
शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्तेदं महायानं सदेव-
मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते रसः
कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणाम-
धर्म्माभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति।
स चेत् सुभूते स्पर्शस्तथाभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः
सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावो-
ऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्।
यस्मात्तर्हि सुभूते स्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्यो-
ऽध्रुवऽशाश्वतो विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं
लोकमभिभूयनिर्याति। स चेत् सुभूते धर्म्मास्तथाऽभविष्यदवि-
तथाऽनन्यतथाऽविपरीताः सत्यायथावन्नित्याध्रुवाः शाश्वता अवि-
परिणामधर्म्माः न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं
लोकमभिभूयनिर्याति।

स चेत् सुभूते चक्षुर्विज्ञानं तथाऽभविष्यदवितथाऽनन्यतथा

ऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषासुरं लोकमभिभूय-निरयास्यत्। यस्मात्तर्हि सुभूते चक्षुर्विज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यध्रुवमशाश्वतं। विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते श्रोत्रविज्ञानं तथा भविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यदेदं महायानं सदेव-मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते श्रोत्र-विज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरि-णामधर्म्माभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिर्भूय-निर्याति। स चेत् सुभूते घ्राणविज्ञानन्तथाऽभविष्यदवितथाऽनन्य-तथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणाम-धर्म्म न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषासुरं लोक-मभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते घ्राणविज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभाव-स्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते जिह्वाविज्ञानं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावो-ऽभविष्यदेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते जिह्वाविज्ञानं कल्पितं विठपितं सन्दर्भितम-नित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते कायविज्ञानं

तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषासुरं लोकभभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते कायविज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते मनोविज्ञानं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते मनोविज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति ।

स चेत् सुभूते चक्षुःसंस्पर्शस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्मा न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते चक्षुःसंस्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभते श्रोत्रसंस्पर्शस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्मा न खल्वभावोऽभविष्यदेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते श्रोत्रसंस्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभि-

भूयनिर्याति। स चेत् सुभूते घ्राणसंस्पर्शस्तथाऽभविष्यदवितथा-ऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽवि-परिणामधर्म्मा न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते घ्राणसंस्पर्शः कल्पितो विठपितः सन्दर्भितो नित्यो ध्रुवोऽशाश्वतो विपरिणामधर्म्माभाव-स्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते जिह्वासंस्पर्शस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावो-ऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते जिह्वासंस्पर्शः कल्पितो विठपितः सन्दर्भितो-ऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते कायसंस्पर्श-स्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्। यस्मात्तर्हि सुभूते कायसंस्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवो-ऽशाश्वतो विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते मनःसंस्पर्शस्तथाऽभविष्यदवि-तथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतो-ऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषा-ऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते मनःसंस्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणाम-धर्म्माभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते चक्षुःसंस्पर्शप्रत्ययवेदितं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म नखल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदितं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदितं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते श्रोत्रसंस्पर्शप्रत्ययवेदितं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते घ्राणसंस्पर्शप्रत्ययवेदितं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते घ्राणसंस्पर्शप्रत्ययवेदितं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते जिह्वासंस्पर्शप्रत्ययवेदितं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते जिह्वासंस्पर्शप्रत्ययवेदितं कल्पितं

विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते कायसंस्पर्शप्रत्ययवेदितं तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते कायसंस्पर्शप्रत्ययवेदितं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते मनःसंस्पर्शप्रत्ययवेदितं तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते मनःसंस्पर्शप्रत्ययवेदितं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते पृथिवीधातुस्तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते पृथिवीधातुः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूतेऽब्धातुस्तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्य-

स्येदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। तस्मात्तर्हि सुभूतेऽग्धातुः कल्पितो विठयितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते तेजोधातुस्तथाऽभविष्यदवितथानन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्योऽध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यस्येदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तेजो धातुः कल्पितो विठयितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते वायुधातुस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यस्येदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते वायुधातुः कल्पितो विठयितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते आकाशधातुस्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यस्येदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते आकाशधातुः कल्पितो विठयितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते विज्ञानधातुस्तथाऽभविष्यदवितथाऽनन्यतथा-

ऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते विज्ञानधातुः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अविद्यातथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूता सत्यायथावन्नित्याध्रुवाशाश्वताऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अविद्या कल्पिता विठपिता सन्दर्भिताऽनित्याऽध्रुवाऽशाश्वताविपरिणामधर्म्मिणी अभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते संस्कारास्तथाभविष्यदवितथाऽनन्यतथाऽविपरीताभूताः सत्यायथावन्नित्याध्रुवाः शाश्वता अविपरिणामधर्म्माणो न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते संस्काराः कल्पिता विठपिताः सन्दर्भिताः अनित्याऽध्रुवाऽशाश्वता विपरिणामधर्म्माणोऽभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते विज्ञानं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यत्तेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते विज्ञानं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिनिर्याति। स चेत्

सुभूते नामरूपं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते नामरूपं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते षड़ायतनं तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते षड़ायतनं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते स्पर्श-स्तथाऽभविष्यदवितथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतोऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते स्पर्शः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतोऽविपरिणाम-धर्म्माऽभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति । स चेत् सुभूते वेदनातथाऽभविष्यदवितथाऽनन्यतथाऽविपरीताभूता-सत्यायथावन्नित्याध्रुवा शाश्वताऽविपरिणामधर्म्मिणी न खल्वभावो-ऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते वेदनाकल्पिताविठपितासन्दर्भिताऽनित्याऽध्रुवा-ऽशाश्वताऽविपरिणामधर्म्मिणी अभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते तृष्णातथाऽभविष्यदवि-

तथाऽनन्यतथाऽविपरीताभूतासत्यायथावन्नित्याध्रुवाशाश्वताऽविपरि-णामधर्म्मिणी न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तृष्णाकल्पिताविठ-पितासन्दर्भिताऽनित्याऽध्रुवाऽशाश्वताविपरिणामधर्म्मिणी अभाव स्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते उपादानं तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावो-ऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते उपादानं कल्पितं विठपितं सन्दर्भितमनित्य-मध्रुवमशाश्वतं विपरिणामधर्म्माऽभावस्तस्मान्महायानं सदेवमानुषा-सुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते भवस्तथाऽभविष्यद्वि-तथाऽनन्यतथाऽविपरीतो भूतः सत्यो यथावन्नित्यो ध्रुवः शाश्वतो-ऽविपरिणामधर्म्मा न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषा-सुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते भवः कल्पितो विठपितः सन्दर्भितोऽनित्योऽध्रुवोऽशाश्वतो विपरिणामधर्म्माभाव-स्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते जातिस्तथाऽभविष्यद्वितथाऽनन्यतथाऽविपरीताभूतासत्या-यथावन्नित्याध्रुवाशाश्वताऽविपरिणामधर्म्मिणी न खल्वभावोऽभविष्य-न्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते जातिः कल्पिताविठपितासन्दर्भिताऽनित्याऽध्रुवाऽशाश्वता विपरिणामधर्म्मिणी अभावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते जरामरणं तथाभविष्यद्वि-

तथाऽनन्य तथाऽविपरीतं भूतं सत्यं यथावन्नित्यं ध्रुवं शाश्वतमविपरिणामधर्म्म न खल्वभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते जरामरणं कल्पितं विठपितं सन्दर्भितमनित्यमध्रुवमशाश्वतं विपरिणामधर्म्माभावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते दानपारमिताऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते दानपारमिताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते शीलपारमिताभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते शीलपारमिताऽभावो न भावस्तस्मान्महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् क्षान्तिपारमिताभावोऽभविष्यन्नेदं महायानं सदेवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते क्षान्तिपारमिताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते वीर्य्यपारमिताऽभावोऽभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते वीर्य्यपारमिताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते ध्यानपारमिताऽभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते ध्यानपारमिताऽभावो न भावस्तस्मान्महायानं। सदेवमानुषाऽसुरं लोकमभिभूयनिर्याति। स चेत् सुभूते प्रज्ञापार-

मिताभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूय-निरयास्यत्। यस्मात्तर्हि सुभूते प्रज्ञापारमिताऽभावो न भाव-स्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते अध्यात्मशून्यताभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अध्यात्मशून्यताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते बहिर्द्धाशून्यताभावो-ऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बहिर्द्धाशून्यताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् अध्यात्मबहिर्द्धा-शून्यताभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभि-भूयनिरयास्यत्। यस्मात्तर्हि सुभूते अध्यात्मबहिर्द्धाशून्यताऽभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते शून्यताशून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते शून्यताशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते महाशून्यताभावोऽभवि-ष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते महाशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते परमार्थ-शून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोक-मभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते परमार्थशून्यता अभावो

न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते संस्कृतशून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते संस्कृतशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते असंस्कृतशून्यताभावोऽभविष्यन्नाऽभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते असंस्कृतशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूतेऽत्यन्तशून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अत्यन्तशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अनवराग्रशून्यताभावोऽभविषन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अनवराग्रशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अनवकारशून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अनवकारशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते प्रकृतिशून्यताभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते प्रकृतिशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते सर्व्वधर्म्मशून्यताभावो-

ऽभविष्यणाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूय-निरयास्यत् । यस्मात्तर्हि सुभूते सर्व्वधर्म्मशून्यता अभावो न भाव-स्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूय निर्याति । स चेत् सुभूते स्वलक्षणशून्यताभावोऽभविष्यणाभावो नेदं महायानं सदेव-मानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते स्वलक्षण-शून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोक-मभिभूयनिर्याति । स चेत् सुभूते अनुपलम्भशून्यताभावोऽभवि-ष्यणाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते अनुपलम्भशून्यता अभावो न भावस्तस्मान्महा-यानं सदेवमानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते ऽभावशून्यताभावोऽभविष्यणाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि सुभूते अभावशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूय-निरयास्यत । स चेत् सुभूते स्वभावशून्यताभावोऽभविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभिभूतनिरयास्यत् । यस्मात्तर्हि सुभूते स्वभावशून्यता अभावो न भावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति । स चेत् सुभूते अभावस्वभाव-शून्यताभावो भविष्यन्नेदं महायानं सदेवमानुषासुरं लोकमभि-भूयनिरयास्यत् । यस्मात्तर्हि सुभूते अभावस्वभावशून्यता अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति ।

स चेत् सुभूते चत्वारिस्मृत्युपस्थानानि भावोऽभविष्यणाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत् । यस्मात्तर्हि

सुभूते स्मृत्युपस्थानानि अभावो न भावस्तस्मान्महायानं सदेव-मानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते सम्यक्प्रहा-णानि भावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोक-मभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते सम्यक्प्रहाणानि अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते ऋद्धिपादाभावोऽभविष्यन्नाभावो नेदं महयानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते ऋद्धि-पादा अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभि-भूयनिर्याति। स चेत् सुभूते इन्द्रियाणिभावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते इन्द्रियाण्यभावस्तस्मान्महायानं सदेवमानुषासुरं लोक-मभिभूयनिर्याति। स चेत् सुभूते बलानि भावोऽभविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बलान्यभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते बोध्यङ्गानिभावोऽभविष्यन्ना-भावो नेदं महायानं सदेवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बोध्यङ्गान्यभावो न भावोस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते मार्गो-भावोऽभविषन्नाभावो नेदं महायानं सदेवमानुषासुरं लोकमभि-भूयनिरयास्यत्। यस्मात्तर्हि सुभूते मार्गोऽभावो न भावस्तस्मान्महा-यानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते आर्य्यसत्यानि भावोभऽविष्यन्नाभावो नेदं महायानं सदेवमानुषासुरं

लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते आर्य्यसत्यान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते ध्यानानि भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते ध्यानान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अप्रमाणानिभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अप्रमाणान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। यस्मात्तर्हि सुभूते आरूप्यसमापत्तयो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते आरूप्यसमापत्तयोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते विमोक्षाभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते विमोक्षा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अनुपूर्व्वविहारसमापत्तयो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूतेऽनुपूर्व्वविहारसमापत्तयो भावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते शून्यतानिमित्ताप्रणिहितविमोक्ष मुखानि भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते शून्यता-

निमित्ताप्रणिहित विमोक्षमुखान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूतेऽभिज्ञा भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अभिज्ञाऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते समाधयो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते समाधयोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते धारणीमुखानि भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते धारणीमुखान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते तथागतबलानि भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तथागतबलान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते वैशारद्यानि भावोऽभविष्यन्नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते वैशारद्यान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते प्रतिसम्विदोभावो अभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते प्रतिषम्विदोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते महाकरुणा-

भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते महाकरुणाऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अष्टादशावेणिकाबुद्धधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अष्टादशावेणिकाबुद्धधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते गोत्र भूधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते गोत्र भूधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अष्टमकधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अष्टमकधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते स्रोत आपन्नधर्म्माभावोऽभविष्यन्नाभावो नेदं मयायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते स्रोत आपन्नधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते सकृदागामिधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते सकृदागामिधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अनागामिधर्म्माभावोऽभविष्यन्नाभावो

नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अनागामिधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते अर्हद्धर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अर्हद्धर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते प्रत्येकबुद्धधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते प्रत्येकबुद्धधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते बोधिसत्त्वधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बोधिसत्त्वधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते बुद्धधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बुद्धधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूते गोत्र भूर्भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते गोत्र भूरभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्यांति। स चेत् सुभूतेऽष्टमको भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूतेऽष्टमकोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं

लोकमभिभूयनिर्याति। स चेत् सुभूते स्रोत आपन्नो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते स्रोत आपन्नोऽभावो न भावस्तस्मात् महायानं स देवमानुषासुरलोकमभिभूयनिर्याति। स चेत् सुभूते सकृदागामी भवोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते सकृदागामी अभावो न भावस्तस्मान्महायानं सदेवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अनागामीभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते अनागामी अभावो न भावस्तस्मान्महायानं स देवमनुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूतेऽर्हन् भावोऽभविष्यन्नाऽभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूतेऽर्हन्न भावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते प्रत्येकबुद्धो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते प्रत्येकबुद्धोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते बोधिसत्त्वो भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते बोधिसत्त्वोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते तथागतोऽर्हन् सम्यक्सम्बुद्धो भावोऽभविष्यन्नाभावो नेदं महायानं स

देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तथागतोऽर्हन् सम्यक्सम्बुद्धोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते धर्म्मधातुर्भावो ऽभविष्यन्नाभावो नेदं महायानं स देवमानुषाऽसुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते धर्म्मधातुरभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते तथताभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तथता ऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते भूतकोटिर्भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते भूतकोटिरभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते ऽचिन्त्यधातुर्भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूतेऽचिन्त्यधातुरभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते स देवमानुषासुरो लोको भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते स देवमानुषासुरो लोकोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रथमचित्तोत्पादमुपादाय यावद्बोधिमण्ड एतस्मिन्नन्तरे ये चित्तोत्पादास्ते भावो

ऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूय-
निरयास्यत्। यस्मात्तर्हि सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रथम-
चित्तोत्पादनमुपादाय यावद्बोधिमण्ड एतस्मिन्नन्तरे ये चित्तो-
त्पादास्तेऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोक-
मभिभूयनिर्याति। स चेत् सुभूते बोधिसत्त्वस्य महासत्त्वस्य वज्रो-
पमं ज्ञानं भावोऽभविष्यन्नाभावो नेदं बोधिसत्त्वोमहासत्त्वः सर्व्व-
वासनाऽनुसन्धिक्लेश न भावं विदित्वा सर्व्वाकारज्ञतामनुप्राप्स्यत्।
स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते
बोधिसत्त्वस्य महासत्त्वस्य वज्रोपमं ज्ञानमभावो न भावस्तस्मा-
द्बोधिसत्त्वोमहासत्त्वः सर्व्ववासनाऽनुसन्धिक्लेशमभावं विदित्वा सर्व्वा-
कारज्ञतामनुप्राप्नोति। स देवमानुषासुरं लोकमभिभूयनिर्याति।
स चेत् सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य द्वात्रिंशन्महापुरुष-
लक्षणानि भावोऽभविष्यन्नाभावो नेदं तथागतोऽर्हन् सम्यक्-
सम्बुद्धः स देवमानुषासुरं लोकमभिभूय तेजसा श्रिया चाभा-
विष्यता तप्स्यत् राजिष्यत्। तस्मात्तर्हि सुभूते तथागतस्यार्हतः
सम्यक्सम्बुद्धस्य द्वात्रिंशन्महापुरुष लक्षणान्यभावो न भावस्तस्मा-
त्तथागतोऽर्हन् सम्यक्सम्बुद्धः स देवमानुषासुरं लोकमभिभूयतेजसा
श्रिया च भासते तपति विराजते। स चेत् सुभूते तथागत-
स्यार्हतः सम्यक्सम्बुद्धस्य भावोऽभविष्यन्नाभावो नेदं तथागतोऽर्हन्
सम्यक्सम्बुद्धो गङ्गानदीवालुकोपमान् लोकधातूना भयाऽस्फुरि-
ष्यत्। यस्मात्तर्हि सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्याभावो न
भावस्तस्मात्तथागतोऽर्हन् सम्यक्सम्बुद्धो गङ्गानदीवालुकोपमान्

लोकधातूना भयास्फुरति। स चेत् सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य षष्ट्यङ्गोपेत स्वरो भावोऽभविष्यन्नाभावो नेदं तथागतोऽर्हन् सम्यक्सम्बुद्धो दशसु दिक्षु अप्रमेयाऽसंख्येयान् लोकधातून् स्वरेणाऽभिव्यज्ञपयिष्यत्। यस्मात्तर्हि सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य षष्ट्यङ्गोपेतः स्वरोऽभावो न भावस्तस्मात्तथागतोऽर्हन् सम्यक्सम्बुद्धो दशसु दिक्षु अप्रमेयासंख्येयान् लोकधातून् स्वरेणाऽभिव्यज्ञापयति। स चेत् सुभूते तथागतस्याऽर्हतः सम्यक्सम्बुद्धस्य धर्म्मचक्रं भावोऽभविष्यन्नाभावो नेदं तथागतोऽर्हन् सम्यक्सम्बुद्धो धर्म्मचक्रं प्रावर्त्तयिष्यत्। अप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण। यस्मात्तर्हि सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य धर्म्मचक्रमभावो न भावस्तस्मात्तथागतोऽर्हन् सम्यक्सम्बुद्धो धर्म्मचक्रं प्रवर्त्तयत्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन मारेण वा केनचिद्वा पुनर्लोके सहधर्म्मेण। स चेत् सुभूते सत्त्वाभावोऽभविष्यन्नाऽभावो येषां कृते तथागतेनार्हता सम्यक्सम्बुद्धेन धर्म्मचक्रं प्रवर्त्तितं नेह ते सत्त्वा अनुपधिशेषे निर्व्वाणधातौ परिणिरवापयिष्यत्। यस्मात्तर्हि सुभूते सत्त्वा अभावो न भाव वा येषां कृते तथागतेनार्हता सम्यक्सम्बुद्धेन धर्म्मचक्रं प्रवर्त्तितं। तस्मात् सत्त्वा अनुपधिशेषे निर्व्वाणधातौ परिनिर्वृताश्च परिनिर्व्वान्ति च परिनिर्व्वास्यति च।

यत्पुनः सुभूतिरेवमाह। आकाशसमं तद्यानमिति। एवमेतत् सुभूते एवमेतत् आकाशसमं तद्यानं तद्यथापि नाम सुभूते

आकाशस्य न पूर्व्वादिक् प्रज्ञायते न दक्षिणा न पश्चिमा नोत्तरा नोर्द्धा नाधो नानुविदिशः प्रज्ञायन्ते। एवमेव सुभूते तस्य महायानस्य न पूर्व्वादिक् प्रज्ञायते न दक्षिणा न पश्चिमानोत्तरा नाऽनुविदिशः प्रज्ञायन्ते। तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न नीलं न पीतं न लोहितं नाऽवदातं नाञ्जिष्ठं न स्फटिकरजतवर्णमेव मेव सुभूते तन्महायानं न नीलं न पीतं न लोहितं नावदातं नाञ्जिष्ठं न स्फटिकरजतवर्णं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं नातीतं नानागतं न प्रत्युत्पन्नमेव मेव सुभूते तन्महायानं नातीतं नानागातं न प्रत्युत्पन्नं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशस्य न हानिर्नवृद्धिर्नपरिहाणिः एवमेव तस्य महायानस्य न हानिर्नवृद्धिर्नपरिहाणिस्तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशस्य न संक्लेशो न व्यवदानमेव मेव सुभूते तस्य महायानस्य न संक्लेशो न व्यवदानं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशस्य नोत्पादो न विरोधो न स्थितिर्नविष्ठिति न स्थितेरण्यथात्वं प्रज्ञायते। एवमेव सुभूते तस्य महायानस्य नोत्पादो न निरोधो न स्थितिर्नविष्ठितिर्नस्थितेरण्यथात्वं प्रज्ञायते। तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न कुशलं नाऽकुशलं न व्याकृतमेव मेव सुभूते तन्महायानं न कुशलं नाऽकुशलं न व्याकृतं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न दृष्टं न श्रुतं न मतं न विज्ञातमेवमेव सुभूते तन्महायानं

न दृष्टं न श्रुतं न मतं न विज्ञातं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न ज्ञेयं नाज्ञेयं न विज्ञेयं न परिज्ञेयं न साक्षात्कर्त्तव्यं न प्रहातव्यं न भावयितव्यमेवमेव सुभूते तन्महायानं न ज्ञेयं नाऽज्ञेयं न विज्ञेयं न परिज्ञेयं न साक्षात्कर्त्तव्यं न प्रहातव्यं न भावयितव्यं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न विपाको न विपाकधर्म्म एवमेव सुभूते तन्महायानं न विपाको न विपाकधर्म्म तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न कामधातुपर्य्यापन्नं न रूपधातुपर्य्यापन्नं नारूप्यधातुपर्य्यापन्नमेवमेव सुभूते तन्महायानं न कामधातुपर्य्यापन्नं न रूपधातुपर्य्यापन्नं नारूप्यधातुपर्य्यापन्नं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न सरागं न विरागं न सद्वेषं न विगतद्वेषं न समोहं न विगतमोहं। एवमेव सुभूते तन्महायानं न सरागं न विरागं न सद्वेषं न विगतद्वेषं न समोहं विगतमोहं। तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशे न प्रथम चित्तोत्पादो न द्वितीयो न तृतीयो न चतुर्थो न पञ्चमो न षष्ठो न सप्तमो नाष्टमो न नवमो न दशमश्चित्तोत्पादः। एवमेव सुभूते तत्र महायाने न प्रथमश्चित्तोत्पादो न द्वितीयो न तृतीयो न चतुर्थो न पञ्चमो न षष्ठो न सप्तमो नाऽष्टमो न नवमो न दशमश्चित्तोत्पादः। तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशे न शुक्लविदर्शनाभूमिर्नगोत्रभूमिर्नाष्टमकभूमिर्न-दर्शनभूमिर्नतनुभूमिर्नवीतरागभूमिर्नकृताविभूमिरेवमेव सुभूते तत्र

महायाने न शुक्लविदर्शनाभूमिर्नगोत्रभूमिर्नाष्टकभूमिर्नदर्शनभूमिर्न-तनुभूमिर्नकृताविभूमिस्तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशे न स्रोतापत्तिफलं न सकृदागामिफलं नाऽनागामिफलं नार्हत्त्वमेवमेव सुभूते तत्र महायाने न स्रोत आपत्तिफलं न सकृदागामिफलं नाऽनागामिफलं तेनोच्यते आकाश-समं तद्यानं। तद्यथापि नाम सुभूते आकाशे न श्रावकभूमिर्न-प्रत्येकबुद्धभूमिर्नबोधिसत्त्वभूमिर्नसम्यक्सम्बुद्धभूमिरेवमेव सुभूते तत्र महायाने न श्रावकभूमिर्नप्रत्येकबुद्धभूमिर्नबोधिसत्त्वभूमिर्नसम्यक्-सम्बुद्धभूमिस्तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न रूपि नारूपि न सनिदर्शनं नानिदर्शनं न प्रतिघं नाऽप्रतिघं न संयुक्तं न वियुक्तमेवमेव सुभूते तन्महायानं न रूपि नारूपि न सनिदर्शनं नाऽनिदर्शनं न प्रतिघं नाऽप्रतिघं न संयुक्तं न वियुक्तं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न नित्यं नाऽनित्यं न सुखं न दुःखं नात्मा नाऽनात्मा न शुभं नाऽशुभं। एवमेव सुभूते तन्महायानं न नित्यं नाऽनित्यं न सुखं न दुःखं नात्मा नाऽनात्मा न शुभं नाऽशुभं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न शून्यं नाऽशून्यं न निमित्तं नाऽनिमित्तं न प्रणिहितं नाऽप्रणिहितमेव-मेव तन्महायानं न शून्यं नाऽशून्यं न निमित्तं नाऽनिमित्तं न प्रणिहितं नाऽप्रणिहितं तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न शान्तं नाऽशान्तं न विविक्तं नाऽविविक्तं। एवमेव सुभूते तन्महायानं न शान्तं नाऽशान्तं न विविक्तं नाऽविविक्तं

तेनोच्यते आकाशसमं तद्यानं तद्यथापि नाम सुभूते आकाशं नालोको न तमः एवमेव सुभूते तन्महायानं नालोको न तमः तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं नोपलभ्यते। एवमेव तन्महायानं नोपलभ्यते। तेनोच्यते आकाशसमं तद्यानं। तद्यथापि नाम सुभूते आकाशं न प्रव्याहारो नाऽप्रव्याहारः। एवमेव सुभूते तन्महायानं न प्रव्याहारो नाऽप्रव्याहारः। तेनोच्यते आकाशसमं तद्यानं। अनेन सुभूते पर्य्यायेणाकाशसमं तद्यानं यदुत महायानम्।

यदपि सुभूतिरेवमाह। यथाकाशेऽप्रमेयानामसंख्येयानां सत्त्वानामवकाशः। एवमेव तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाश इति। एवमेतत् सुभूते एवमेतत् यथाकाशेऽप्रमेयाणामसंख्येयानां सत्वानामवकाशः। एवमेतस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्वानामवकाशः। तत्कस्य हेतोः सत्त्वासत्तया हि सुभूते आकाशासत्तावेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। अनेनापि पर्य्यायेण तस्मिन् महायाने अप्रमेयानामसंख्येयानां तत्त्वानामवकाशः। तत्कस्य हेतोस्तथा हि सुभूते ये च सत्त्वा यच्चाकाशं यच्च महायानं सर्व्वं तन्नोपलभ्यते। पुनरपरं सुभूते सत्त्वाप्रमाणतया आकाशप्रमाणतावेदितव्या। आकाशप्रमाणतया महायानप्रमाणतावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते ये च सत्त्वायच्चाकाशं यच्च महायानं सर्व्वं तन्नोपलभ्यते। पुनरपरं सुभूते सत्त्वापरिमाणतया आकाशापरिमाणता-

वेदिता। आकाशापरिमाणतया महायानाऽपरिमाणतावेदिता। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते ये च यच्चाकाशं यच्च महायानं सर्व्वमेतन्नोपलभ्यते। पुनरपरं सुभूते सत्त्वासत्तया-धर्म्मधात्वसत्तावेदितव्या। धर्म्मधात्वसत्तया आकाशासत्तावेदितव्या। आकाशासत्तया महायानासत्तावेदितव्या। महायानासत्तया अप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तयाऽपरिमाणासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते ये च सत्त्वा यश्च धर्म्मधातुर्यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चापरिमाणं सर्व्वमेतन्नोपलभ्यते। पुनरपरं सुभूते सत्त्वासत्तया तथताऽसत्तावेदितव्या। तथताऽसत्तया आकाशाऽसत्तावेदितव्या। आकाशासत्तयामहायानाऽसत्तावेदितव्या। महायानाऽसत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तयाऽपरिमाणासत्तयासर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते ये च सत्त्वायश्चधर्म्मधातुर्यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चाऽसंख्येयं यच्चाऽपरिमाणं सर्व्वमेतन्नोपलभ्यते। पुनरपरं सुभूते सत्त्वाऽसत्तया तथताऽसत्तावेदितव्या। तथताऽसत्तया आकाशासत्तावेदितव्या। आकाशाऽसत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेया-

ऽसत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तयाऽपरिमाणासत्ता-वेदितव्या। अपरिमाणासत्तयासर्व्वधर्म्माऽसत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वा-नामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते ये च सत्त्वाया च तथता यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चाऽपरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मसत्तयासत्त्वाऽसत्तावेदितव्या। सत्त्वा-ऽसत्तयाजीवाऽसत्तावेदितव्या। जीवाऽसत्तयाजन्त्वसत्तावेदितव्या। जन्त्वसत्तयापोषाऽसत्तावेदितव्या। पोषासत्तयापुरुषासत्तावेदि-तव्या। पुरुषाऽसत्तयापुद्गलासत्तावेदितव्या। पुद्गलासत्तयामनुजा-सत्तावेदितव्या। मनुजाऽसत्तयामानवासत्तावेदितव्या। मानवा-ऽसत्तयाकारकासत्तावेदितव्या। कारकासत्तयावेदकासत्तावेदि-तव्या। वेदकासत्तयाजानकासत्तावेदितव्या। जानकाऽसत्तया-पश्यकाऽसत्तावेदितव्या। पश्यकाऽसत्तयाभूतकोट्यसत्तयावेदितव्या। भूतकोट्यसत्तया आकाशासत्तावेदितव्या। आकाशासत्तयामहा-यानाऽसत्तावेदितव्या। महायानाऽसत्तयाऽप्रमेयाऽसत्तावेदितव्या। अप्रमेयाऽसत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयाऽसत्तयाऽपरि-माणासत्तावेदितव्या। अपरिमाणासत्तयासर्व्वधर्म्माऽसत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यस्यात्मा यस्य सत्त्वो यस्य जीवो यस्य जन्तुर्यस्य पोषो यस्य पुरुषा यस्य पुद्गलः। यस्य मनुजो यस्य मानवो। यस्य कारकोऽकारको यस्य जानको यस्य

पश्यको या च भूतकोटि यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चाऽपरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते। पुनरपरं सुभूते आत्माऽसत्तया सत्त्वाऽसत्तावेदितव्या। सत्त्वाऽसत्तया जीवाऽसत्तावेदितव्या। जीवाऽसत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषाऽसत्तावेदितव्या। पोषाऽसत्तया पुरुषासत्तावेदितव्या। पुरुषाऽसत्तया पुद्गलासत्तावेदितव्या। पुद्गलासत्तया मनुजासत्तावेदितव्या। मनुजाऽसत्तया मानवासत्तावेदितव्या। मानवासत्तया कारकासत्तावेदितव्या। कारकाऽसत्तया वेदकाऽसत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकाऽसत्तया पश्यकाऽसत्तावेदितव्या। पश्यकासत्तयाऽचिन्त्यधात्वसत्तावेदितव्या। अचिन्त्यधात्वसत्तया रूपाऽसत्तावेदितव्या। रूपासत्तया वेदनासत्तावेदितव्या। वेदनासत्तया संज्ञाऽसत्तावेदितव्या। संज्ञासत्तया संस्काराऽसत्तावेदितव्या। संस्काराऽसत्तया विज्ञानाऽसत्तावेदितव्या। विज्ञानासत्तया आकाशासत्तावेदितव्या। आकाशासत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयाऽसत्तावेदितव्या। असंख्येयाऽसत्तयाऽपरिमाणासत्तवेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यश्चाऽचिन्त्यधातुर्यच्च रूपं या च वेदनाया च संज्ञा

ये च संस्कारा यच्च विज्ञानं यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चाऽपरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते। पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या। सत्त्वासत्तया जीवासत्तावेदितव्या। जीवासत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषासत्तावेदितव्या। पोषासत्तया पुरुषासत्तावेदितव्या। पुरुषासत्तया पुद्गलासत्तावेदितव्या। पुद्गलासत्तया मनुजासत्तावेदितव्या। मनुजासत्तया मानवाऽसत्तावेदितव्या। मानवासत्तयाकारकासत्तावेदितव्या। कारकासत्तया वेदकासत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकासत्तया पश्यकासत्तावेदितव्या। पश्यकासत्तया चक्षुरसत्तावेदितव्या। चक्षुरसत्तया श्रोत्रासत्तावेदितव्या। श्रोत्रासत्तया घ्राणासत्तावेदितव्या। घ्राणासत्तया जिह्वासत्तावेदितव्या। जिह्वासत्तया कायासत्तावेदितव्या। कायासत्तया मनोऽसत्तावेदितव्या। मनोऽसत्तया आकाशसत्तवेदितव्या। आकाशसत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयाऽसत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयसत्तयाऽपरिमाणासत्तावेदितव्या। अपरिमाणाऽसत्तया सर्व्वधर्म्माऽसत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्चकारको यश्च वेदको यश्च जानको यश्च पश्यको यच्च चक्षुर्यच्च श्रोत्रं यच्च घ्राणं यच्च जिह्वा यश्च कायः यच्च मनः

यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। तत्सर्व्वं नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या। सत्त्वासत्तया जीवाऽसत्तावेदितव्या। जीवासत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषासत्तावेदितव्या। पोषासत्तया पुरुषासत्तावेदितव्या। पुरुषासत्तया पुद्गलासत्तावेदितव्या। पुद्गलासत्तया मनुजासत्तावेदितव्या। मनुजासत्तया मानवासत्तावेदितव्या। मानवासत्तया कारकसत्तावेदितव्या। कारकसत्तया वेदकासत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकासत्तया पश्यकासत्तावेदितव्या। पश्यकासत्तया रूपासत्तावेदितव्या। रूपासत्तया शब्दासत्तावेदितव्या। शब्दासत्तया गन्धासत्तावेदितव्या। गन्धासत्तया रसासत्तावेदितव्या। रसासत्तया स्पर्शासत्तावेदितव्या। स्पर्शासत्तया धर्म्मासत्तावेदितव्या। धर्म्मासत्तया आकाशसत्तावेदितव्या। आकाशासत्तया महायानसत्तावेदितव्या। महायानसत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयसत्तयाऽपरिमाणासत्तावेदितव्या। अपरिमाणसत्तया सर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयाणां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथा हि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तु यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यच्च रूपं यश्च शब्दः यश्च गन्धो यश्च रसो यश्च स्पर्शः ये च धर्म्माः यच्चाकाशं यच्च

महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चाऽपरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या। सत्त्वासत्तया जीवासत्तावेदितव्या। जीवासत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषासत्तावेदितव्या। पोषासत्तया पुरुषासत्तावेदितव्या। पुरुषासत्तया पुद्गलासत्तावेदितव्या। पुद्गलासत्तया मनुजासत्तावेदितव्या। मनुजासत्तया मानवासत्तावेदितव्या। मानवासत्तया कारकासत्तावेदितव्या। कारकासत्तया वेदकासत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकासत्तया पश्यकासत्तावेदितव्या। पश्यकसत्तया चक्षुर्व्विज्ञानासत्तावेदितव्या। चक्षुर्व्विज्ञानासत्तया श्रोत्रविज्ञानासत्तावेदितव्या। श्रोत्रविज्ञानासत्तया घ्राणविज्ञानासत्तावेदितव्या। घ्राणविज्ञानासत्तया जिह्वाविज्ञानासत्तावेदितव्या। जिह्वाविज्ञानासत्तया कायविज्ञानासत्तावेदितव्या। कायविज्ञानासत्तया मनोविज्ञानासत्तावेदितव्या। मनोविज्ञानासत्तया आकाशसत्तावेदितव्या। आकाशासत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तयाऽपरिमाणासत्तावेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण महायानेऽप्रमेयाणामसंख्येयाणां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यस्यात्मा यस्य सत्त्वो यस्य जीव यस्य जन्तुर्यस्य पोषो यस्य पुरुषो यस्य पुद्गलो यस्य मनुजो यस्य मानवो यस्य कारको यस्य वेदको यस्य जानको यस्य पश्यको

यच्चचक्षुर्व्विज्ञानं यच्च श्रोत्रव्विज्ञानं यच्च घ्राणविज्ञानं यच्च जिह्वाविज्ञानं यच्च कायविज्ञानं यच्च मनोविज्ञानं यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या। सत्त्वासत्तया जीवासत्तावेदितव्या। जीवासत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषासत्तावेदितव्या। पोषसत्तया पुरुषसत्तावेदितव्या। पुरुषसत्तया पुद्गलासत्तावेदितव्या। पुद्गलसत्तया मनुजासत्तावेदितव्या। मनुजासत्तया मानवासत्तावेदितव्या। मानवासत्तया कारकासत्तावेदितव्या। कारकासत्तया वेदकासत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकासत्तया पश्यकासत्तावेदितव्या। पश्यकासत्तया चक्षुःसंस्पर्शासत्तावेदितव्या। चक्षुःसंस्पर्शासत्तया श्रोत्रसंस्पर्शासत्तावेदितव्या। श्रोत्रसंस्पर्शासत्तया घ्राणसंस्पर्शासत्तावेदितव्या। घ्राणसंस्पर्शासत्तया जिह्वासंस्पर्शासत्तावेदितव्या। जिह्वासंस्पर्शासत्तया कायसंस्पर्शासत्तावेदितव्या। कायसंस्पर्शासत्तया मनःसंस्पर्शासत्तावेदितव्या। मनःसंस्पर्शासत्तया आकाशासत्तावेदितव्या। आकाशसत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तया अपरिमाणासत्तावेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयाणां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि यश्चात्मा यश्च सत्त्वो यश्च

जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यश्च चक्षुःसंस्पर्शो यश्च श्रोत्रसंस्पर्शो यश्च घ्राणसंस्पर्शो यश्च जिह्वासंस्पर्शो यश्च कायसंस्पर्शो यश्च मनःसंस्पर्शो यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चाऽसंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः । सर्व्वमेतन्नोपलभ्यते ।

पुनरपरं सुभूते आत्मासत्तया सत्वासत्तावेदितव्या । सत्वासत्तया जीवासत्तावेदितव्या । जीवासत्तया जन्त्वसत्तावेदितव्या । जन्त्वसत्तया पोषासत्तावेदितव्या । पोषासत्तया पुरुषासत्तावेदितव्या । पुरुषासत्तया पुद्गलासत्तावेदितव्या । पुद्गलासत्तया मनुजासत्तावेदितव्या । मनुजासत्तया मानवासत्तावेदितव्या । मानवासत्तया कारकासत्तावेदितव्या । कारकासत्तया वेदकासत्तावेदितव्या । वेदकासत्तया जानकासत्तावेदितव्या । जानकासत्तया पश्यकासत्तावेदितव्या । पश्यकासत्तया चक्षुःसंस्पर्शजावेदनासत्तावेदितव्या । चक्षुःसंस्पर्शजावेदनासत्तया श्रोत्रसंस्पर्शजावेदनासत्तावेदितव्या । श्रोत्रसंस्पर्शजावेदनासत्तया घ्राणसंस्पर्शजावेदनासत्तावेदितव्या । घ्राणसंस्पर्शजावेदनासत्तया जिह्वासंस्पर्शजावेदनासत्तावेदितव्या । जिह्वासंस्पर्शजावेदनासत्तया कायसंस्पर्शजावेदनासत्तावेदितव्या । कायसंस्पर्शजावेदनासत्तया मनःसंस्पर्शजावेदनासत्तावेदितव्या । मनःसंस्पर्शजावेदनासत्तया आकाशासत्तावेदितव्या । आकाशासत्तया महायानासत्तावेदितव्या । महायानासत्तयाऽप्रमेयासत्तावेदितव्या । अप्रमेयासत्तया असंख्येयासत्तावेदितव्या । असंख्येयासत्तया अपरिमाणासत्तावेदितव्या । अपरि-

माणामत्तया सर्व्वधर्म्मामत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयाणां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको या च चक्षुःसंस्पर्शजावेदना या च श्रोत्रसंस्पर्शजावेदना या च घ्राणसंस्पर्शजावेदना या च जिह्वासंस्पर्शजावेदना या च कायसंस्पर्शजावेदना या च मनःसंस्पर्शजावेदना यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मामत्तया सत्त्वामत्तावेदितव्या। सत्त्वामत्तया जीवामत्तावेदितव्या। जीवामत्तया जन्त्वमत्तावेदितव्या। जन्त्वमत्तया पोषामत्तावेदितव्या। पोषामत्तया पुरुषामत्तावेदितव्या। पुरुषामत्तया पुद्गलामत्तावेदितव्या। पुद्गलामत्तया मनुजामत्तावेदितव्या। मनुजामत्तया मानवामत्तावेदितव्या। मानवामत्तया कारकामत्तावेदितव्या। कारकामत्तया वेदकामत्तावेदितव्या। वेदकामत्तया जानकामत्तावेदितव्या। जानकामत्तया पश्यकामत्तावेदितव्या। पश्यकामत्तया पृथिवीधात्वमत्तावेदितव्या। पृथिवीधात्वमत्तया अब्धात्वमत्तावेदितव्या। अब्धात्वमत्तया तेजोधात्वमत्तवेदितव्या। तेजोधात्वमत्तया वायुधात्वमत्तावेदितव्या। वायुधात्वमत्तया आकाशधात्वमत्तावेदितव्या। आकाशधात्वमत्तया विज्ञानधात्वमत्तावेदितव्या। विज्ञानधात्वमत्तया आकाशामत्तावेदितव्या। आकाशामत्तया महायानामत्तावेदितव्या। महायाना-

सत्तया अप्रमेयासत्तावेदितव्या । अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या । असंख्येयासत्तया अपरिमाणासत्तावेदितव्या । अपरिमाणासत्तया सर्व्वधर्म्मासत्तावेदितव्या । अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः । तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यश्च पृथिवीधातुर्यश्चाब्धातुर्यश्च तेजोधातुर्यश्च वायुधातुर्यश्चाकाशधातुर्यश्च विज्ञानधातुर्यच्चाकाशं यच्च महायानं यच्चाप्रमेयं । यच्चाऽसंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः । सर्व्वमेतन्नोपलभ्यते ।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या । सत्त्वासत्तया जीवासत्तावेदितव्या । जीवासत्तया जन्त्वसत्तावेदितव्या । जन्त्वसत्तया पोषासत्तावेदितव्या । पोषासत्तया पुरुषासत्तावेदितव्या । पुरुषासत्तया पुद्गलासत्तावेदितव्या । पुद्गलासत्तया मनुजासत्तावेदितव्या । मनुजासत्तया मानवासत्तावेदितव्या । मानवासत्तया कारकासत्तावेदितव्या । कारकासत्तया वेदकासत्तावेदितव्या । वेदकासत्तया जानकासत्तावेदितव्या । जानकासत्तया पश्यकासत्तावेदितव्या । पश्यकासत्तया अविद्यासत्तावेदितव्या । अविद्यासत्तया संस्कारासत्तावेदितव्या । संस्कारासत्तया विज्ञानासत्तावेदितव्या । विज्ञानासत्तया नामरूपासत्तावेदितव्या । नामरूपासत्तया षड़ायतनासत्तावेदितव्या । षड़ायतनासत्तया स्पर्शासत्तावेदितव्या । स्पर्शासत्तया वेदनासत्तावेदितव्या । वेदनासत्तया

तृष्णासत्तावेदितव्या। तृष्णासत्तया उपादानासत्तावेदितव्या। उपादानासत्तया भवासत्तावेदितव्या। भवासत्तया जात्यसत्तावेदितव्या। जात्यसत्तया जरामरणासत्तावेदितव्या। जरामरणासत्तया आकाशासत्तावेदितव्या। आकाशासत्तया महायानासत्तावेदितव्या। महायानासत्तयाऽप्रमेयासत्तावेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्तावेदितव्या। असंख्येयासत्तया अपरिमाणासत्तावेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तु र्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यच्चाऽविद्या ये च संस्कारा यच्च विज्ञानं यच्च नाम रूपं यच्च षड़ायतनं यश्च स्पर्शो या च वेदनाया च तृष्णा यच्चोपादानं यश्च भवो या च जातिर्यच्च जरामरणं यच्चाकाशं यच्च महायानं यच्चाऽप्रमेयं यच्चाऽसंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तावेदितव्या। सत्त्वासत्तया जीवासत्तावेदितव्या। जीवासत्तया जन्त्वसत्तावेदितव्या। जन्त्वसत्तया पोषासत्तावेदितव्या। पोषासत्तया पुरुषासत्तावेदितव्या। पुरुषासत्तया पुद्गलासत्तावेदितव्या। पुद्गलासत्तया मनुजासत्तावेदितव्या। मनुजासत्तया मानवासत्तावेदितव्या। मानवासत्तया कारकासत्तावेदितव्या। कारकासत्तया वेदकासत्तावेदितव्या। वेदकासत्तया जानकासत्तावेदितव्या। जानकासत्तया

पश्यकासक्तावेदितव्या। पश्यकासक्तया दानपारमिताऽसक्तावेदितव्या। दानपारमिताऽसक्तया शीलपारमितासक्तावेदितव्या। शीलपारमितासक्तया क्षान्तिपारमितासक्तावेदितव्या। क्षान्तिपारमितासक्तया वीर्य्यपारमितासक्तावेदितव्या। वीर्य्यपारमितासक्तया ध्यानपारमितासक्तावेदितव्या। ध्यानपारमितासक्तया प्रज्ञापारमितासक्तावेदितव्या। प्रज्ञापारमितासक्तया आकाशासक्तावेदितव्या। आकाशासक्तया महायानासक्तावेदितव्या। महायानासक्तयाऽप्रमेयासक्तावेदितव्या। अप्रमेयासक्तयाऽसंख्येयासक्तावेदितव्या। असंख्येयासक्तया अपरिमाणासक्तावेदितव्या। अपरिमाणासक्तया सर्व्वधर्म्मासक्तावेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायानेऽप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि। यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तु र्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवोयश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको या च दानपारमिताया च शीलपारमिताया च क्षान्तिपारमिताया च वीर्य्यपारमिताया च ध्यानपारमिताया च प्रज्ञापारमिता यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासक्तया सत्त्वासक्तावेदितव्या। सत्त्वासक्तया जीवासक्तावेदितव्या। जीवासक्तया जन्त्वसक्तावेदितव्या। जन्त्वसक्तया पोषासक्तावेदितव्या। पोषासक्तया पुरुषासक्तावेदितव्या। पुरुषासक्तया पुद्गलासक्तावेदितव्या। पुद्गलासक्तया

मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया अध्यात्मशून्यतासत्ता वेदितव्या। अध्यात्मशून्यतासत्तया बहिर्द्धाशून्यतासत्ता वेदितव्या। बहिर्द्धाशून्यतासत्तया अध्यात्मबहिर्द्धाशून्यतासत्ता वेदितव्या। अध्यात्मबहिर्द्धाशून्यतासत्तया शून्यताशून्यतासत्ता वेदितव्या। शून्यताशून्यतासत्तया महाशून्यतासत्ता वेदितव्या। महाशून्यतासत्तया परमार्थशून्यतासत्ता वेदितव्या। परमार्थशून्यतासत्तया संस्कृतशून्यतासत्ता वेदितव्या। संस्कृतशून्यतासत्तयाऽसंस्कृतशून्यतासत्ता वेदितव्या। असंस्कृतशून्यतासत्तया अत्यन्तशून्यतासत्ता वेदितव्या। अत्यन्तशून्यतासत्तया अनवराग्रशून्यतासत्ता वेदितव्या। अनवराग्रशून्यतासत्तया अनवकारशून्यतासत्ता वेदितव्या। अनवकारशून्यतासत्तया प्रकृतिशून्यतासत्ता वेदितव्या। प्रकृतिशून्यतासत्तया सर्व्वधर्म्मशून्यतासत्तावेदितव्या। सर्व्वधर्म्मशून्यतासत्तया स्वलक्षणशून्यता वेदितव्या। स्वलक्षणशून्यतासत्तया अनुपलम्भशून्यतासत्ता वेदितव्या। अनुपलम्भशून्यतासत्तया अभावशून्यतासत्ता वेदितव्या। अभावशून्यतासत्तया स्वभावशून्यतासत्ता वेदितव्या। स्वभावशून्यतासत्तया अभावस्वभावशून्यतासत्ता वेदितव्या। अभावस्वभावशून्यता सत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तया अपरिमाणासत्तावेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या।

अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुङ्गलो यश्च मनुजा यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको या चाऽध्यात्मशून्यता या च बहिर्द्धाशून्यतायाचाध्यात्मबहिर्द्धाशून्यतायाच शून्यताशून्यतायाच महाशून्यतायाच परमार्थशून्यतायाच संस्कृतशून्यतायाचासंस्कृतशून्यतायाचात्यन्तशून्यतायाचानवराग्रशून्यतायाचानवकारशून्यतायाच प्रकृतिशून्यतायाच सर्व्वधर्म्मशून्यतायाच स्वलक्षणशून्यतायाचाऽनुपलम्भशून्यतायाचाऽभावशून्यतायाच स्वभावशून्यतायाचाऽभावस्वभावशून्यता यच्चाकाशं यच्च महायानं यच्चाऽपरिमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्ता वेदितव्या। सत्त्वासत्तया जीवसत्ता वेदितव्या। जीवसत्तया जन्त्वसत्ता वेदितव्या। जन्त्वसत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुङ्गलासत्ता वेदितव्या। पुङ्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया स्मृत्युपस्थानासत्ता वेदितव्या। स्मृत्युपस्थानासत्तया सम्यक्प्रहाणासत्ता वेदितव्या। सम्यक्प्रहाणासत्तया ऋद्धिपादासत्ता वेदितव्या। ऋद्धिपादासत्तया इन्द्रिया-

सत्ता वेदितव्या। इन्द्रियासत्तया बलासत्ता वेदितव्या। बलासत्तया बोध्यङ्गासत्ता वेदितव्या। बोध्यङ्गासत्तया आर्य्याष्टाङ्गमार्गासत्ता वेदितव्या। आर्य्याष्टाङ्गमार्गासत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तयाऽप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्ता वेदितव्या। असंख्येयासत्तया अपरिमाणासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यानि स्मृत्युपस्थानानि यानि सम्यक् प्रहाणानि ये चर्द्धिपादाः यानीन्द्रियाणि यानि बलानि यानि बोध्यङ्गानि यश्चार्य्याष्टाङ्गमार्गो यच्चाकाशं यच्च महायानं यच्चाऽपरिमेयं यच्चाऽसंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्ता वेदितव्या। सत्त्वासत्तया जीवासत्ता वेदितव्या। जीवासत्तया जन्त्वसत्ता वेदितव्या। जन्त्वसत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुद्गलासत्ता वेदितव्या। पुद्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया आर्य्यसत्यासत्ता वेदितव्या।

आर्य्यसत्यासत्तया ध्यानासत्ता वेदितव्या। ध्यानासत्तया अप्रमाणासत्ता वेदितव्या। अप्रमाणासत्तया आरूप्यसमापत्त्यसत्ता वेदितव्या। आरूप्यसमापत्त्यसत्तया विमोक्षासत्ता वेदितव्या। विमोक्षासत्तया अनुपूर्व्वविहारसमापत्त्यसत्ता वेदितव्या। अनुपूर्व्वविहारसमापत्त्यसत्तया शून्यतानिमित्ताप्रणिहितविमोक्षमुखासत्ता वेदितव्या। शून्यतानिमित्ताप्रणिहितविमोक्षमुखासत्तया अभिज्ञासत्ता वेदितव्या। अभिज्ञासत्तया समाध्यसत्ता वेदितव्या। समाध्यसत्तया धारणीमुखासत्ता वेदितव्या। धारणीमुखासत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्ता वेदितव्या। असंख्येयासत्तया अपरिमाणासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यानि चार्य्यसत्यानि यानि चाप्रमाणानि याश्चारूप्यसमापत्तयो ये च विमोक्षा याश्चानुपूर्व्वविहारसमापत्तयो यानि च शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि याश्चाऽभिज्ञाः ये च समाधयो यानि च धारणीमुखानि यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्तया वेदितव्या। सत्त्वा-

सत्तया जीवासत्ता वेदितव्या। जीवासत्तया जन्तुसत्ता वेदितव्या। जन्तुसत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुद्गलासत्ता वेदितव्या। पुद्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया तथागतबलासत्ता वेदितव्या। तथागतबलासत्तया वैशारद्यासत्ता वेदितव्या। वैशारद्यासत्तया प्रतिसम्विदसत्ता वेदितव्या। प्रतिसम्विदसत्तया महाकरुणासत्ता वेदितव्या। महाकरुणासत्तया आवेणिकबुद्धधर्म्मासत्तावेदितव्या। आवेणिकबुद्धधर्म्मासत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तयाऽसंख्येयासत्ता वेदितव्या। असंख्येयासत्तयाऽपरिमाणासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यानि च तथागतबलानि यानि च वैशारद्यानि याश्च प्रतिसम्विदो या च महाकरुणा ये चावेणिकबुद्धधर्म्माः यच्चाकाशं यच्च महायानं यच्चापरिमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्ता वेदितव्या। सत्त्वासत्तया जीवासत्ता वेदितव्या। जीवासत्तया जन्त्वसत्ता वेदितव्या। जन्त्वसत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुद्गलासत्ता वेदितव्या। पुद्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया गोत्रभूधर्म्मासत्ता वेदितव्या। गोत्रभूधर्म्मासत्तया अष्टामकधर्म्मासत्ता वेदितव्या। अष्टामकधर्म्मासत्तया दर्शनकभूम्यसत्ता वेदितव्या। दर्शनकभूम्यसत्तया तनुभूम्यसत्ता वेदितव्या। तनुभूम्यसत्तया वीतरागभूम्यसत्ता वेदितव्या। वीतरागभूम्यसत्तया कृताविभूम्यसत्ता वेदितव्या। कृताविभूम्यसत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तया असंख्येयासत्ता वेदितव्या। असंख्येयासत्तया अपरिमानासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशं। तत्कस्य हेतोस्तथाहि सुभूते यस्यात्मा यस्य सत्त्वो यस्य जीवो यस्य जन्तुर्यस्य पोषो यस्य पुरुषो यस्य पुद्गलो यस्य मनुजोयस्य मानवो यस्य कारको यस्य वेदको यस्य जानको यस्य पश्यको ये च गोत्रभूधर्म्माः ये चाष्टामकधर्म्माः ये च दर्शनकभूमिधर्म्माः ये च तनुभूमिधर्म्माः ये च वीतरागभूमिधर्म्माः ये च कृताविधर्म्माः

यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्ता वेदितव्या। सत्त्वासत्तया जीवासत्ता वेदितव्या। जीवासत्तया जन्त्वसत्ता वेदितव्या। जन्त्वसत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुद्गलासत्ता वेदितव्या। पुद्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया स्रोत आपन्नासत्ता वेदितव्या। स्रोत आपन्नासत्तया सकृदागाम्यसत्ता वेदितव्या। सकृदागाम्यसत्तया अनागाम्यसत्ता वेदितव्या। अनागाम्यसत्तया अर्हदसत्ता वेदितव्या। अर्हदसत्तया आकाशासत्ता वेदितव्या। आकाशासत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तया असंख्येयासत्ता वेदितव्या। असंख्येयासत्तया अपरिमाणासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथा हि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यश्च स्रोत आपन्नो यश्च सकृदागामी यश्चानागामी यश्चार्हन् यच्चाकाशं यच्च महायानं

यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः । सर्व्वमेतन्नोपलभ्यते ।

पुनरपरं सुभूते आत्मासत्तया सत्त्वासत्ता वेदितव्या । सत्त्वासत्तया जीवासत्ता वेदितव्या । जीवासत्तया जन्त्वसत्ता वेदितव्या । जन्त्वसत्तया पोषासत्ता वेदितव्या । पोषासत्तया पुरुषासत्ता वेदितव्या । पुरुषासत्तया पुद्गलासत्ता वेदितव्या । पुद्गलासत्तया मनुजासत्ता वेदितव्या । मनुजासत्तया मानवासत्ता वेदितव्या । मानवासत्तया कारकासत्ता वेदितव्या । कारकासत्तया वेदकासत्ता वेदितव्या । वेदकासत्तया जानकासत्ता वेदितव्या । जानकासत्तया पश्यकासत्ता वेदितव्या । पश्यकासत्तया प्रत्येकबुद्धासत्ता वेदितव्या । प्रत्येकबुद्धसत्तया सम्यक्सम्बुद्धासत्ता वेदितव्या । सम्यक्सम्बुद्धासत्तया आकाशासत्ता वेदितव्या । आकाशासत्तया महायानासत्ता वेदितव्या । महायानासत्तया अप्रमेयासत्ता वेदितव्या । अप्रमेयासत्तयाऽसंख्येयासत्ता वेदितव्या । असंख्येयासत्तया अपरिमाणासत्ता वेदितव्या । अपरिमाणासत्तया सर्व्वधर्म्मासत्ता वेदितव्या । अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्रमेयाणामसंख्येयानां सत्त्वानामवकाशः । तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यश्च प्रत्येकबुद्धो यश्च सम्यक्सम्बुद्धो यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं येच सर्व्वधर्म्माः । सर्व्वमेतन्नोपलभ्यते ।

पुनरपरं सुभूते आत्मासत्तया सत्त्वसत्ता वेदितव्या । सत्त्वासत्तया

जीवासत्ता वेदितव्या। जीवासत्तया जन्तुसत्ता वेदितव्या। जन्तु-सत्तया पोषासत्ता वेदितव्या। पोषासत्तया पुरुषासत्ता वेदितव्या। पुरुषासत्तया पुद्गलासत्ता वेदितव्या। पुद्गलासत्तया मनुजासत्ता वेदितव्या। मनुजासत्तया मानवासत्ता वेदितव्या। मानवासत्तया कारकासत्ता वेदितव्या। कारकासत्तया वेदकासत्ता वेदितव्या। वेदकासत्तया जानकासत्ता वेदितव्या। जानकासत्तया पश्यकासत्ता वेदितव्या। पश्यकासत्तया श्रावकयानासत्ता वेदितव्या। श्रावक-यानासत्तया प्रत्येकबुद्धयानासत्ता वेदितव्या। प्रत्येकबुद्धयानासत्तया बुद्धयानासत्ता वेदितव्या। बुद्धयानासत्तया सर्व्वाकारज्ञतासत्ता वेदि-तव्या। सर्व्वाकारज्ञतासत्तया आकाशासत्ता वेदितव्या। आकाशा-सत्तया महायानासत्ता वेदितव्या। महायानासत्तया अप्रमेयासत्ता वेदितव्या। अप्रमेयासत्तया असंख्येयासत्ता वेदितव्या। असंख्येया-सत्तया अपरिमाणासत्ता वेदितव्या। अपरिमाणासत्तया सर्व्वधर्म्मा-सत्ता वेदितव्या। अनेनापि सुभूते पर्य्यायेण तस्मिन् महायाने अप्र-मेयाणामसंख्येयानां सत्त्वानामवकाशः। तत्कस्य हेतोस्तथाहि सुभूते यश्चात्मा यश्च सत्त्वो यश्च जीवो यश्च जन्तुर्यश्च पोषो यश्च पुरुषो यश्च पुद्गलो यश्च मनुजो यश्च मानवो यश्च कारको यश्च वेदको यश्च जानको यश्च पश्यको यच्च श्रावकयानं यच्च प्रत्येकबुद्धयानं यच्च बुद्धयानं यच्च सर्व्वाकारज्ञता यच्चाकाशं यच्च महायानं यच्चाप्रमेयं यच्चासंख्येयं यच्चापरिमाणं ये च सर्व्वधर्म्माः। सर्व्वमेतन्नोपलभ्यते।

तद्यथापि नाम सुभूते निर्व्वाणधातावप्रमेयाणामसंख्येयाना-मपरिमाणानां सत्त्वानामवकाशः। एवमेव तस्मिन् महायाने-

ऽप्रमेयानामसंख्येयानामपरिमाणानां सत्त्वानामवकाशः। अनेनापि सुभूते पर्य्यायेण यथाकाशे अप्रमेयाणामसंख्येयाणामपरिमाणानां सत्त्वानामवकाशः। एवमेव तस्मिन् महायानेऽप्रमेयाणामसंख्येयाणामपरिमाणानां सत्त्वानामवकाशः। यदपि सुभूतिरेवमाह नापि तस्य महायानस्य गतिर्दृश्यते नागतिर्दृश्यते न स्थानं दृश्यते इति। एवमेतत् सुभूते एवमेतत्। न तस्य महायानस्यागतिर्व्वा गतिर्व्वा दृश्यते। तत्कस्य हेतोरचलाहि सुभूते सर्व्वधर्म्माः। तेन कुतश्चिदागच्छन्ति न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोस्तथाहि सुभूते रूपं न कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। तत्कस्य हेतोर्नहि सुभूते रूपस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न रूपस्य तथता कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न रूपस्य स्वभावः कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न रूपस्य लक्षणं कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदना कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते वेदनायाः प्रकृतिः कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनायास्तथता कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनायाः स्वभावः कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनाया लक्षणं कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संज्ञा कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते संज्ञायाः प्रकृतिः कुतश्चिदा-

गच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संज्ञायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न संज्ञायाः स्वभावः कुतश्चिदागच्छतिर्नक्वचिद्गच्छति न क्वचित्तिष्ठति। न संज्ञाया लक्षणं कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते संस्काराणां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराणां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराणां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराणां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते विज्ञानस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न विज्ञानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न चक्षुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते चक्षुषः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न चक्षुषस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न चक्षुषः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति।

न चक्षुषो लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचि-
त्तिष्ठति। न श्रोत्रं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि
त्तिष्ठति। तत्कस्यहेतोर्न हि सुभूते श्रोत्रस्य प्रकृतिः कुतश्चिदा-
गच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न श्रोत्रस्य तथता
कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। श्रोत्रस्य
स्वभावो न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।
श्रोत्रस्य लक्षणं न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि-
त्तिष्ठति। न घ्राणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि-
त्तिष्ठति। तत्कस्यहेतोर्न हि सुभूते घ्राणस्य प्रकृतिः कुतश्चिदा-
गच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणस्य तथता
कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणस्य
स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति।
न घ्राणस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि-
त्तिष्ठति। न जिह्वा कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि-
त्तिष्ठति। तत्कस्यहेतोर्न हि सुभूते जिह्वायाः प्रकृतिः कुतश्चि-
दागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वाया-
स्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न
जिह्वायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचि-
त्तिष्ठति। न जिह्वाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्ग-
च्छति न क्वचित्तिष्ठति। न कायः कुतश्चिदागच्छति। न क्वचि-
द्गच्छति न क्वचित्तिष्ठति। तत्कस्यहेतोर्न हि सुभूते कायस्य
प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति।

न कायस्य तथता न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्यहेतोर्न हि सुभूते मनसः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनसस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनसः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनसो लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न रूपं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते रूपस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न रूपस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न रूपस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न रूपस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न शब्दः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते शब्दस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शब्दस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शब्दस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शब्दस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न गन्धः

कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते गन्धस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न गन्धस्य तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न गन्धस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न गन्धस्य लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति । न क्वचित्तिष्ठति । न रसः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते रसस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न रसस्य तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति । न क्वचित्तिष्ठति । न रसस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न रसस्य लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न स्पर्शः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते स्पर्शस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न स्पर्शस्य तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न स्पर्शस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न स्पर्शस्य लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न धर्माः कुतश्चिदागच्छन्ति । न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति । तत्कस्य हेतोर्न हि सुभूते धर्माणां प्रकृतिः कुतश्चिदागच्छन्ति । न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति । न धर्माणां तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न धर्माणां

स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न धर्म्माणां लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति ।

न चक्षुर्व्विज्ञानं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते चक्षुर्व्विज्ञानस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चक्षुर्व्विज्ञानस्य तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चक्षुर्व्विज्ञानस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चक्षुर्व्विज्ञानस्य लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छनि न क्वचित्तिष्ठति । न श्रोत्रविज्ञानं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते श्रोत्रविज्ञानस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वं त्तिष्ठति । न श्रोत्रविज्ञानस्य तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न श्रोत्रविज्ञानस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न श्रोत्रविज्ञानस्य लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न घ्राणविज्ञानं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते घ्राणविज्ञानस्य प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न घ्राणविज्ञानस्य तथता न कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न घ्राणविज्ञानस्य स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न घ्राण-

विज्ञानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वाविज्ञानं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते जिह्वाविज्ञानस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वाविज्ञानस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वाविज्ञानस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वाविज्ञानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायविज्ञानं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते कायविज्ञानस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायविज्ञानस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायविज्ञानस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायविज्ञानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनोविज्ञानं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते मनोविज्ञानस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनोविज्ञानस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनोविज्ञानस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनोविज्ञानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न चक्षुःसंस्पर्शः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते चक्षुःसंस्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शः कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते श्रोत्रसंस्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते घ्राणसंस्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते जिह्वासंस्पर्श प्रकृतिः

कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते कायसंस्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते मनःसंस्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न चक्षुःसंस्पर्शजावेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोस्तथाहि न हि सुभूते चक्षुःसंस्पर्शजा वेदनयाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शजा वेदनयास्तथता कुतश्चिदागच्छति।

न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न चक्षुःसंस्पर्शजा वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शजा वेदनाया कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोस्तथाहि नहि सुभूते श्रोत्रसंस्पर्शजा वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शजा वेदनायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न श्रोत्रसंस्पर्शजा वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शजा वेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते घ्राणसंस्पर्शजा वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शजा वेदनायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न घ्राणसंस्पर्शजा वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शजा वेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते जिह्वासंस्पर्शजा वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शजा वेदनायास्तथता

कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जिह्वासंस्पर्शजा वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शजा वेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते कायसंस्पर्शजा वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शजा वेदनायास्तथता न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न कायसंस्पर्शजा वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शजा वेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते मनःसंस्पर्शजा वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शजा वेदनायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मनःसंस्पर्शजा वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न पृथिवीधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते पृथिवीधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न पृथिवीधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न पृथिवीधातोः स्वभावः कुतश्चिदागच्छति। न क्वचि-

द्गच्छति न क्वचित्तिष्ठति। न पृथिवीधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽब्धातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूतेऽब्धातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽब्धातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽब्धातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽब्धातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तेजोधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते तेजोधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तेजोधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तेजोधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तेजोधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वायुधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते वायुधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वायुधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वायुधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वायुधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाकाशधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि

सुभूते आकाशधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाकाशधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाकाशधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाकाशधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न विज्ञानधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते विज्ञानधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विज्ञानधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽविद्या कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अविद्यायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽविद्यायास्तथता कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽविद्यायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाविद्याया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति। न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते संस्काराणां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराणां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्काराणां

स्वभावः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न संस्काराणां लक्षणं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न विज्ञानं सुभूते कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते विज्ञानस्य प्रकृतिः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न विज्ञानस्य तथता कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न विज्ञानस्य स्वभावः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न विज्ञानस्य लक्षणं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न नामरूपं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते नामरूपस्य प्रकृतिः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न नामरूपस्य तथता कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न नामरूपस्य स्वभावः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न नामरूपस्य लक्षणं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न षड़ायतनं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते षड़ायतनस्य प्रकृतिः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न षड़ायतनस्य तथता कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न षड़ायतनस्य स्वभावः कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न षड़ायतनस्य लक्षणं कुतश्चिदागच्छति। न कचिद्गच्छति न कचित्तिष्ठति। न स्पर्शः कुतश्चिदागच्छति। न कचिद्गच्छति न कचि-

न्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते स्पर्शस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्पर्शस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्पर्शस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्पर्शस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदना कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते वेदनायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वेदनाया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तृष्णा कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते तृष्णायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तृष्णायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तृष्णायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तृष्णायाः लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नोपादानं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते उपादानस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नोपादानस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नोपादानस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्ग-

च्छति न क्वचित्तिष्ठति। नोपादानस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भवः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते भवस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भवस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भवस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भवस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जातिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते जातेः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। न जातेस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जाते. स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जातेर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जरामरणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते जरामरणस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जरामरणस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जरामरणस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न जरामरणस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न दानपारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते दानपारमितायाः

प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दानपारमितायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दानपारमितायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दानपारमिताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शीलपारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते शीलपारमितायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शीलपारमितायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शीलपारमितायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शीलपारमिताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न क्षान्तिपारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते क्षान्तिपारमितायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न क्षान्तिपारमितायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न क्षान्तिपारमितायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न क्षान्तिपारमितायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वीर्य्यपारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते वीर्य्यपारमितायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वीर्य्यपारमिता-

यास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वीर्य्यपारमितायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वीर्य्यपारमितायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानपारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते ध्यानपारमितायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानपारमितायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानपारमितायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानपारमितायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रज्ञापारमिता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते प्रज्ञापारमितायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रज्ञापारमितायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रज्ञापारमितायाः स्वभावः कुतश्चिदागच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रज्ञापारमितायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

नाऽध्यात्मशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते ग्रध्यात्मशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न

क्वचित्तिष्ठति। नाध्यात्मशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मशून्यतायाल्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बहिर्द्धाशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते बहिर्द्धाशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बहिर्द्धाशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बहिर्द्धाशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बहिर्द्धाशून्यतायाल्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मबहिर्द्धाशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अध्यात्मबहिर्द्धाशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मबहिर्द्धाशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मबहिर्द्धाशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाध्यात्मबहिर्द्धाशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यताशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते शून्यताशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यताशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यताशून्यतायाः स्वभावः कुतश्चिदागच्छति। न

कश्चिद्गच्छति न क्वचित्तिष्ठति। न शून्यताशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न महाशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते महाशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न महाशून्यतातथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न महाशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न महाशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न परमार्थशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते परमार्थशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न परमार्थशून्यतायास्तथता न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न परमार्थशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न परमार्थशून्यताया लक्षणं न कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते संस्कृतशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

नासंस्कृतशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते असंस्कृतशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नासंस्कृतशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नासंस्कृतशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नासंस्कृतशून्यतायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नात्यन्तशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अत्यन्तशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नात्यन्तशून्यतायास्तथता न कुत श्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नात्यन्तशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नात्यन्तशून्यतायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवराग्रशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अनवराग्रशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवराग्रशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवराग्रशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवराग्रशून्यतायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवकारशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अनवकारशून्य-

तायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवकारशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवकारशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नानवकारशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रकृतिशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते प्रकृतिशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रकृतिशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रकृतिशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न प्रकृतिशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सर्व्वधर्म्मशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते सर्व्वधर्म्मशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सर्व्वधर्म्मशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सर्व्वधर्म्मशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सर्व्वधर्म्मशून्यतायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वलक्षणशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते स्वलक्षणशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वलक्षणशून्यतायास्तथता कुत-

श्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वलक्षणशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वलक्षणशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽनुपलम्भशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अनुपलम्भशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽनुपलम्भशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽनुपलम्भशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽनुपलम्भशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽभावशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अभावशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभावशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभावशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभावशून्यतायाः लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वभावशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते स्वभावशून्यतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वभावशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वभावशून्यतायाः स्वभावः कुतश्चिदागच्छति।

न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्वभावशून्यताया लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभाव-स्वभावशून्यता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते अभावस्वभावशून्यतायाः प्रकृतिः कुतश्चिदाच्छति न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽभाव-स्वभावशून्यतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽभावस्वभावशून्यतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभावस्वभावशून्यतायालक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

*न स्मृत्युपस्थानानि कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते स्मृत्युपस्थानानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्मृत्युप-स्थानानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्मृत्युपस्थानानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न स्मृत्युपस्थानानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सम्यक्प्रहाणानि कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते सम्यक्प्रहाणानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सम्यक्प्रहाणानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सम्यक्प्रहाणानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सम्यक्प्रहा-

* This form occurs in all MSS.

णानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नर्द्धिपादाः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते ऋद्धिपादानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नर्द्धिपादानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नर्द्धिपादानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नर्द्धिपादानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नेन्द्रियाणि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते इन्द्रियाणां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नेन्द्रियाणां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नेन्द्रियाणां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नेन्द्रियाणां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

न बलानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते बलानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बलानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बलानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बलानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोध्यङ्गानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते बोध्यङ्गानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोध्यङ्गानां

तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोध्यङ्गानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोध्यङ्गानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मार्गः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते मार्गस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मार्गस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मार्गस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न मार्गस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नार्य्यसत्यानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते आर्य्यसत्यानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नार्य्यसत्यानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति। न क्वचित्तिष्ठति। नार्य्यसत्यानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नार्य्यसत्यानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते ध्यानानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न ध्यानानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

नाप्रमाणानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते अप्रमाणानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचिद्गत्तिष्ठति। नाप्रमाणानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाप्रमाणानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाप्रमाणानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नारूप्यसमापत्तयः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते आरूप्यसमापत्तीनां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नारूप्यसमापत्तीनां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नारूप्यसमापत्तीनां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नारूप्यसमापत्तीनां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विमोक्षाः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते विमोक्षाणां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विमोक्षाणां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न विमोक्षाणां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽनुपूर्व्वविहार समापत्तयः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते नवानुपूर्व्वविहार समापत्तीनां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न नवानुपूर्व्वविहार समापत्तीनां तथता कुतश्चिदागच्छति। न

क्वचिद्गच्छति न क्वचित्तिष्ठति। न नवानुपूर्व्वविहार समापत्तीनां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न नवानुपूर्व्वविहार समापत्तीनां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽभिज्ञाः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते अभिज्ञानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभिज्ञानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभिज्ञानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाभिज्ञानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न समाधयः कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते समाधीनां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न समाधीनां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न समाधीनां स्वभावः

कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न समाधीनां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धारणीमुखानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते धारणीमुखानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धारणीमुखानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धारणीमुखानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धारणीमुखानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दशतथागतबलानि न कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते दशानां तथागतबलानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दशानां तथागतबलानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दशानां तथागतबलानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न दशानां तथागतबलानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न चत्वारि वैशारद्यानि कुतश्चिदागच्छन्ति। न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति। तत्कस्य हेतोर्न हि सुभूते वैशारद्यानां प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वैशारद्यानां तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वैशारद्यानां स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न वैशारद्यानां लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न

क्वचित्तिष्ठति । न चतस्रः प्रतिसम्विदः कुतश्चिदागच्छन्ति । न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति । तत्कस्य हेतोर्न हि सुभूते चतसृणां प्रतिसम्विदां प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चतसृणां प्रतिसम्विदां तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चतसृणां प्रतिसम्विदां स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न चतसृणां प्रतिसम्विदां लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न महाकरुणा कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । तत्कस्य हेतोर्न हि सुभूते महाकरुणायाः प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न महाकरुणायास्तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न महाकरुणायाः स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । न महाकरुणाया लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । नाष्टादशावेणिकाबुद्धधर्माः कुतश्चिदागच्छन्ति । न क्वचिद्गच्छन्ति न क्वचित्तिष्ठन्ति । तत्कस्य हेतोर्न हि सुभूते आवेणिकबुद्धधर्माणां प्रकृतिः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । नावेणिकबुद्धधर्माणां तथता कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । नावेणिकबुद्धधर्माणां स्वभावः कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति । नावेणिकबुद्धधर्माणां लक्षणं कुतश्चिदागच्छति । न क्वचिद्गच्छति न क्वचित्तिष्ठति ।

न सुभूते धर्मधातुः कुतश्चिदागच्छति । न क्वचिद्गच्छति न

क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते धर्म्मधातोः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धर्म्मधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धर्म्मधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न धर्म्मधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते तथतायाः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तथतायास्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तथतायाः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न तथतायार्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भूतकोटिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते भूतकोटेः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भूतकोटेस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भूतकोटेः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न भूतकोटेर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते ऽचिन्त्यधातुः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते ऽचिन्त्यधातो प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽचिन्त्यधातोस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति।

नाचिऽन्त्यधातोः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽचिन्त्यधातोर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते बोधिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते बोधेः प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोधेस्तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोधेः स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बोधेर्लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते बुद्धः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते बुद्धस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बुद्धस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बुद्धस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न बुद्धस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते संस्कृतं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतस्य तथता कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न संस्कृतस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। न सुभूते ऽसंस्कृतं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। तत्कस्य हेतोर्न हि सुभूते ऽसंस्कृतस्य प्रकृतिः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽसंस्कृतस्य तथता कुतश्चिदा-

गच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽसंस्कृतस्य स्वभावः कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। नाऽसंस्कृतस्य लक्षणं कुतश्चिदागच्छति। न क्वचिद्गच्छति न क्वचित्तिष्ठति। एवं तस्य महायानस्य नागतिर्दृश्यते न गतिर्दृश्यते न स्थानं दृश्यते।

यदपि सुभूतेरेवमाह। नाप्यस्य यानस्य पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्य उपलभ्यते। त्र्यध्वसमतानामेदं यानं महायानं। तस्मान्महायानमित्युच्यते। इति। एवमेतत् सुभूते एवमेतत्। नाप्यस्य यानस्य पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्य उपलभ्यते। त्र्यध्वसमतानामेदं यानं तस्मान्महायानमित्युच्यते। तत्कस्य हेतोस्तथा हि सुभूते अतीतोऽध्वाऽतीतेन शून्यः। अनागतोऽध्वाऽनागतेन शून्यः। प्रत्युत्पन्नोऽध्वाप्रत्युत्पन्नेन शून्यः। त्र्यध्वसमता त्र्यध्वसमतया शून्यः। महायानं महायानेन शून्यः। बोधिसत्त्वो बोधिसत्त्वेन शून्यः। न सुभूते शून्यता एका न द्वे न तिस्रः न चतस्रः न पञ्च न षट् न सप्त नाष्टौ न नव न दश न पृथक् तस्मात् त्र्यध्वसमताया न मिदं बोधिसत्त्वानां महासत्त्वानां नैवात्र समतोपलभ्यते। न विषमता। नैवात्र राग उपलभ्यते। न विरागः। न द्वेष उपलभ्यते नाऽद्वेषः। न मोह उपलभ्यते नामोहः। न नामोपलभ्यते ना नाम। न संस्कृत उपलभ्यते नाऽसंस्कृतः। न कुशलमुपलभ्यते नाऽकुशलं। न सावद्यमुपलभ्यते नाऽनावद्यं। न साश्रवमुपलभ्यते नाऽनाश्रवं। न संक्लेशमुपलभ्यते न निक्लेशं। न लौकिकमुपलभ्यते न लोकोत्तरं। नोत्पाद्य उपलभ्यते न निरोधं। न संक्लेशमुपलभ्यते न व्यवदानं। नैवात्र नित्यमुपलभ्यते

नाऽनित्यं। न सुखमुपलभ्यते न दुःखं। नात्मोपलभ्यते नाऽनात्मा। न शान्तमुपलभ्यते नाऽशान्तं। न कामधातुरुपलभ्यते न कामधातुसमतिक्रमः। न रूपधातुरुपलभ्यते न रूपधातुसमतिक्रमः। नारूप्यधातुरुपलभ्यते नारूप्यधातुसमतिक्रमः। न संसार उपलभ्यते न निर्व्वाणं। तत्कस्य हेतोस्तथाह्यस्य स्वभावो नोपलभ्यते।

अतीतं सुभूते रूपमतीते न रूपेण शून्यं तत्कस्य हेतोर्न हि शून्यतायामतीतं रूपमुपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते कुतः पुनः शून्यतायामतीतं रूपमुपलभ्यते। अतीता वेदना अतीतया वेदनयाशून्या। तत्कस्य हेतोर्न हि शून्यतायामतीता वेदनोपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते कुतः पुनः शून्यतायामतीतो वेदनोपलभ्यते। अतीता संज्ञा अतीतया संज्ञया शून्या। तत्कस्य हेतोर्न हि शून्यतायामतीता संज्ञोपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामतीता संज्ञोपलभ्यते। अतीताः संस्काराः अतीतैः संस्कारैः शून्या तत्कस्य हेतोर्न हि सुभूते शून्यतायामतीताः संस्कारा उपलभ्यन्ते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामतीताः संस्कारा उपलभ्यन्ते। अतीतं विज्ञानमतीते न विज्ञानेन शून्यं। तत्कस्य हेतोर्न हि शून्यतायामतीतं विज्ञानमुपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामतीतं विज्ञानमुपलभ्यते।

अनागतं सुभूते रूपमनागते न रूपेण शून्यं। तत्कस्य हेतोर्न हि शून्यतायामनागतं रूपमुपलभ्यते। शून्यतैव तावच्छून्याशून्य-

तयोपलभ्यते। कुतः पुनः शून्यतायामनागतं रूपमुपलभ्यते। अनागता वेदना अनागतया वेदनया शून्या। तत्कस्य हेतोर्न हि शून्यतायामनागता वेदनोपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामनागता वेदनोपलभ्यते। अनागता संज्ञा अनागतया संज्ञयाशून्या। तत्कस्य हेतोर्न हि सुभूते अनागता संज्ञोपलभ्यते। शून्यतैव तावच्छून्याशून्यतया-नोपलभ्यते। कुतः पुनः शून्यतायामनागता संज्ञोपलभ्यते। अनागताः संस्काराः अनागतैः संस्कारैः शून्याः। तत्कस्य हेतोर्न हि सुभूते शून्यतायामनागताः संस्काराः उपलभ्यन्ते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामनागताः संस्कारा उपलभ्यन्ते। अनागतं विज्ञानमनागते न विज्ञानेन शून्यं। तत्कस्य हेतोर्न सुभूते शून्यतायामनागतं विज्ञानमुपलभ्यते शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायामनागतं विज्ञानमुपलभ्यते।

प्रत्युत्पन्नं सुभूते रूपं प्रत्युत्पन्नेन रूपेण शून्यं। तत्कस्य हेतोर्न हि सुभूते शून्यतायां प्रत्युत्पन्नं रूपमुपलभ्यते। शून्यतैव तावच्छून्या-शून्यतया नोपलभ्यते। कुतः पुनः शून्यतायां प्रत्युत्पन्नं रूपमुप-लभ्यते। प्रत्युत्पन्ना वेदना प्रत्युत्पन्नया वेदनया शून्या। तत्कस्य हेतोर्न हि सुभूते शून्यतायां प्रत्युत्पन्नावेदनोपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायां प्रत्युत्पन्ना-वेदनोपलभ्यते। प्रत्युत्पन्ना संज्ञा प्रत्युत्पन्नया संज्ञया शून्या। तत्कस्य हेतोर्न हि शून्यतायां प्रत्युत्पन्ना संज्ञोपलभ्यते। शून्यतैव

तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायां प्रत्युत्पन्ना संज्ञोपलभ्यते। प्रत्युत्पन्ना संस्काराः प्रत्युत्पन्नैः संस्कारैः शून्याः। तत्कस्य हेतोर्न हि सुभूते शून्यतायां प्रत्युत्पन्नाः संस्काराः उपलभ्यन्ते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायां प्रत्युत्पन्नाः संस्काराः उपलभ्यन्ते। प्रत्युत्पन्नं विज्ञानं प्रत्युत्पन्नेन विज्ञानेन शून्यं। तत्कस्य हेतोर्न हि सुभूते शून्यतायां प्रत्युत्पन्नं विज्ञानमुपलभ्यते। शून्यतैव तावच्छून्याशून्यतया नोपलभ्यते। कुतः पुनः शून्यतायां प्रत्युत्पन्नं विज्ञानमुपलभ्यते।

पूर्व्वान्ततः सुभूते दानपारमिता नोपलभ्यते। अपरान्ततो दानपारमिता नोपलभ्यते। प्रत्युत्पन्नतो दनापारमिता नोपलभ्यते। त्र्यध्वसमतायां दानपारमिता नोपलभ्यते। न सुभूते समतायामतीताध्वोपलभ्यते। न समतायामनागताध्वोपलभ्यते। न समतायां प्रत्युत्पन्नाध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीताध्वोपलभ्यते। कुतोऽनागतोध्वोपलभ्यते। कुतः पुनः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः शीलपारमिता नोपलभ्यते। अपरान्ततः शीलपारमितानोपलभ्यते। प्रत्युत्पन्नतः शीलपारमिता नोपलभ्यते। त्र्यध्वसमतायां शीलपारमिता नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते समतायामतीतोऽध्वोपलभ्यते। न समतायामनागतोऽध्वोपलभ्यते। न समतायां प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः क्षान्तिपारमिता नोपलभ्यते।

अपरान्ततः क्षान्तिपारमिता नोपलभ्यते। प्रत्युत्पन्नतः क्षान्तिपारमिता नोपलभ्यते। अध्वसमतायां क्षान्तिपारमिता नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते समतायामतीतोऽध्वोपलभ्यते। न समतायामनागतोऽध्वोपलभ्यते। न समतायां प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा उपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततो वीर्य्यपारमिता नोपलभ्यते। अपरान्ततो वीर्य्यपारमिता नोपलभ्यते। प्रत्युत्पन्नतो वीर्य्यपारमिता नोपलभ्यते। अध्वसमतायां वीर्य्यपारमिता नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते समतायामतीतोऽध्वोपलभ्यते। न समतायामनागतोऽध्वोपलभ्यते। न समतायां प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततो ध्यानपारमिता नोपलभ्यते। अपरान्ततो ध्यानपारमिता नोपलभ्यते। प्रत्युत्पन्नतो ध्यानपारमिता नोपलभ्यते। अध्वसमतायां ध्यानपारमिता नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते समतायामतीतोऽध्वोपलभ्यते। न समतायामनागतोऽध्वोपलभ्यते। न समतायां प्रत्युत्पन्नोऽध्वोपलभ्यते! समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते प्रज्ञापारमिता नोपलभ्यते। अपरान्ततः प्रज्ञापारमिता नोपलभ्यते। प्रत्युत्पन्नतः प्रज्ञापारमिता नोपलभ्यते। अध्वसमतायां प्रज्ञापारमिता नोपलभ्यते। तत्कस्य

हेतोर्न हि सुभूते समतायामतीतोऽध्वोपलभ्यते। न समतायामनागतोऽध्वोपलभ्यते न समतायां प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते।

पूर्वान्ततः सुभूते अध्यात्मशून्यता नोपलभ्यते। अपरान्ततोऽध्यात्मशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽध्यात्मशून्यता नोपलभ्यते। अध्वसमतायामध्यात्मशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वोपलभ्यते। न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्वान्ततः सुभूते बहिर्द्धाशून्यता नोपलभ्यते। अपरान्ततो बहिर्द्धाशून्यता नोपलभ्यते। प्रत्युत्पन्नतो बहिर्द्धाशून्यता नोपलभ्यते। अध्वसमतायां बहिर्द्धाशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वोपलभ्यते। न प्रत्युत्पन्नोऽध्वोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्वान्ततः सुभूते ऽध्यात्मबहिर्द्धाशून्यता नोपलभ्यते। अपरान्ततोऽध्यात्मबहिर्द्धाशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽध्यात्मबहिर्द्धाशून्यता नोपलभ्यते। अध्वसमतायामध्यात्मबहिर्द्धाशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वोपलभ्यते। न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां

नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतो-ऽनागतोऽध्वोपलभ्यते। कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते शून्यताशून्यता नोपलभ्यते। अपरान्ततः शून्यताशून्यता नोपलभ्यते। प्रत्युत्पन्नतः शून्यताशून्यता नोपलभ्यते। अध्वसमतायां शून्यताशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्यत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते महाशून्यता नोपलभ्यते। अपरान्ततो महाशून्यता नोपलभ्यते। प्रत्युत्पन्नतो महाशून्यता नोपलभ्यते। अध्वसमतायां महाशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनपगतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते परमार्थशून्यता नोपलभ्यते। अपरान्ततः परमार्थशून्यता नोपलभ्यते। प्रत्युत्पन्नतः परमार्थशून्यता नोपलभ्यते। अध्वसमतायां परमार्थशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते संस्कृतशून्यता नोपलभ्यते। अपरान्ततः संस्कृतशून्यता नोपलभ्यते। प्रत्युत्पन्नतः संस्कृतशून्यता नोपलभ्यते। अध्वसमतायां संस्कृतशून्यता नोपलभ्यते। न सुभूते

समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते ऽसंस्कृतशून्यता नोपलभ्यते। अपरान्ततोऽसंस्कृतशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽसंस्कृतशून्यता नोपलभ्यते। ऋध्वसमतायामसंस्कृतशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते अत्यन्तशून्यता नोपलभ्यते। अपरान्ततोऽत्यन्तशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽत्यन्तशून्यता नोपलभ्यते। ऋध्वसमतायामत्यन्तशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते ऽनवराग्रशून्यता नोपलभ्यते। अपरान्ततोऽनवराग्रशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽनवराग्रशून्यता नोपलभ्यते। ऋध्वसमतायामनवराग्रशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते ऽनवकारशून्यता नोपलभ्यते। अपरान्ततोऽनवकारशून्यता

नोपलभ्यते। प्रत्युत्पन्नतोऽनवकारशून्यता नोपलभ्यते। अध्वसमतायामनवकारशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतो न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते प्रकृतिशून्यता नोपलभ्यते। अपरान्ततः प्रकृतिशून्यता नोपलभ्यते। प्रत्युत्पन्नतः प्रकृतिशून्यता नोपलभ्यते। अध्वसमतायां प्रकृतिशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते सर्व्वधर्म्मशून्यता नोपलभ्यते। अपरान्ततः सर्व्वधर्म्मशून्यता नोपलभ्यते। प्रत्युत्पन्नतः सर्व्वधर्म्मशून्यता नोपलभ्यते। अध्वसमतायां सर्व्वधर्म्मशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते स्वलक्षणशून्यता नोपलभ्यते। अपरान्ततः स्वलक्षणशून्यता नोपलभ्यते। प्रत्युत्पन्नतः स्वलक्षणशून्यता नोपलभ्यते। अध्वसमतायां स्वलक्षणशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत् समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते।

कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते
ऽनुपलम्भशून्यता नोपलभ्यते। अपरान्ततोऽनुपलम्भशून्यता नोप-
लभ्यते। प्रत्युत्पन्नतोऽनुपलम्भशून्यता नोपलभ्यते। अध्वसमताया-
ऽनुपलम्भशून्यता नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोप-
लभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्-
समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते।
कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते
अभावशून्यता नोपलभ्यते। अपरान्ततोऽभावशून्यता नोपलभ्यते।
प्रत्युत्पन्नतोऽभावशून्यता नोपलभ्यते। अध्वसमतायामभावशून्यता
नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतो-
ऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते।
कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः
प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते स्वभावशून्यता नोपलभ्यते।
अपरान्ततः स्वभावशून्यता नोपलभ्यते। प्रत्युत्पन्नतः स्वभावशून्यता
नोपलभ्यते। अध्वसमतायां स्वभावशून्यता नोपलभ्यते। न सुभूते
समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोप-
लभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः सम-
तायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नो-
ऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते ऽभावस्वभावशून्यता नोपलभ्यते।
अपरान्ततोऽभावस्वभावशून्यता नोपलभ्यते। प्रत्युत्पन्नतोऽभाव-
स्वभावशून्यता नोपलभ्यते। अध्वसमतायामभावस्वभावशून्यता नोप-
लभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा

न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते।

पूर्वान्ततः सुभूते स्मृत्युपस्थानानि नोपलभ्यन्ते। अपरान्ततः स्मृत्युपस्थानानि नोपलभ्यन्ते। प्रत्युत्पन्नतः स्मृत्युपस्थानानि नोपलभ्यन्ते। अध्वसमतायां स्मृत्युपस्थानानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्वान्ततः सुभूते सम्यक्प्रहाणानि नोपलभ्यन्ते। अपरान्ततः सम्यक्प्रहाणानि नोपलभ्यन्ते। प्रत्युत्पन्नतः सम्यक्प्रहाणानि नोपलभ्यन्ते। अध्वसमतायां सम्यक्प्रहाणानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्वान्ततः सुभूते ऋद्धिपादा नोपलभ्यन्ते। अपरान्ततः ऋद्धिपादा नोपलभ्यन्ते। प्रत्युत्पन्नत ऋद्धिपादा नोपलभ्यन्ते। अध्वसमतायामृद्धिपादा नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीताध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्वान्ततः सुभूते इन्द्रियाणि नोपलभ्यन्ते। अपरान्ततः इन्द्रियाणि नोपलभ्यन्ते। प्रत्युत्पन्नत इन्द्रियाणि नोपलभ्यन्ते। अध्वसमताया-

मिन्द्रियाणि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते बलानि नोपलभ्यन्ते। अपरान्ततो बलानि नोपलभ्यन्ते। प्रत्युत्पन्नतो बलानि नोपलभ्यन्ते। अध्वसमतायां बलानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते बोध्यङ्गानि नोपलभ्यन्ते। अपरान्ततो बोध्यङ्गानि नोपलभ्यन्ते। प्रत्युत्पन्नतो बोध्यङ्गानि नोपलभ्यन्ते। अध्वसमतायां बोध्यङ्गानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते आर्य्याष्टाङ्गमार्गो नोपलभ्यते। अपरान्ततः आर्य्याष्टाङ्गमार्गो नोपलभ्यते। प्रत्युत्पन्नत आर्य्याष्टाङ्गमार्गो नोपलभ्यते। अध्वसमतायामार्य्याष्टाङ्गमार्गो नोपलभ्यते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते आर्य्यसत्यानि नोपलभ्यन्ते। अपरान्तत आर्य्यसत्यानि नोपलभ्यन्ते।

प्रत्युत्पन्नत आर्य्यसत्यानि नोपलभ्यन्ते । अध्वसमतायामार्य्यसत्यानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते। कुत पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते ध्यानानि नोपलभ्यन्ते । अपरान्ततो ध्यानानि नोपलभ्यन्ते । प्रत्युत्पन्नतो ध्यानानि नोपलभ्यन्ते । अध्वसमतायां ध्यानानि नोपलभ्यन्ते । न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते अप्रमाणानि नोपलभ्यन्ते । अपरान्ततोऽप्रमाणानि नोपलभ्यन्ते । प्रत्युत्पन्नतोऽप्रमाणानि नोपलभ्यन्ते । अध्वसमतायामप्रमाणानि नोपलभ्यन्ते । न सुभूते समतायामतीतोऽध्वोपलभ्यते । नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते आरूप्यसमापत्तयो नोपलभ्यन्ते । अपरान्तत आरूप्यसमापत्तयो नोपलभ्यन्ते । प्रत्युत्पन्नत आरूप्यसमापत्तयो नोपलभ्यन्ते। अध्वसमतायामारूप्यसमापत्तयो नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते । नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते।

पूर्व्वान्ततः सुभूते अष्टौ विमोक्षा नोपलभ्यन्ते। अपरान्ततोऽष्टौ विमोक्षा नोपलभ्यन्ते। प्रत्युत्पन्नतोऽष्टौ विमोक्षा नोपलभ्यन्ते। अध्वसमतायामष्टौ विमोक्षा नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते नवानुपूर्व्वविहारसमापत्तयो नोपलभ्यन्ते। अपरान्ततो नवानुपूर्व्वविहारसमापत्तयो नोपलभ्यन्ते। प्रत्युत्पन्नतो नवानुपूर्व्वविहारसमापत्तयो नोपलभ्यन्ते। अध्वसमतायां नवानुपूर्व्वविहारसमापत्तयो नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नोपलभ्यन्ते। अपरान्ततः शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नोपलभ्यन्ते। प्रत्युत्पन्नतः शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नोपलभ्यन्ते। अध्वसमतायां शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नोपलभ्यन्ते। न सुभूते समतायामतीतोऽध्वोपलभ्यते। नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते। समतैव तावत्समतायां नोपलभ्यते। कुतः पुनः समतायामतीतोऽध्वोपलभ्यते। कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते। पूर्व्वान्ततः सुभूते अभिज्ञानोपलभ्यते। अपरान्ततोऽभिज्ञानोपलभ्यते। प्रत्युत्पन्नतोऽभिज्ञानोपलभ्यते। अध्वसमतायामभिज्ञा-

नोपलभ्यते । न सुभूते समतायामतीतोऽध्वोपलभ्यते । नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते समाधयो नोपलभ्यन्ते । अपरान्ततः समाधयो नोपलभ्यन्ते । प्रत्युत्पन्नतः समाधयो नोपलभ्यन्ते । अध्वसमतायां समाधयो नोपलभ्यन्ते । न सुभूते समतायामतीतोऽध्वोपलभ्यते । नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते धारणीमुखानि नोपलभ्यन्ते । अपरान्ततो धारणीमुखानि नोपलभ्यन्ते । प्रत्युत्पन्नतो धारणीमुखानि नोपलभ्यन्ते । अध्वसमतायां धारणीमुखानि नोपलभ्यन्ते । न सुभूते समतायामतीतोऽध्वोपलभ्यते । नाऽनागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते दशतथागतबलानि नोपलभ्यन्ते । अपरान्ततो दशतथागतबलानि नोपलभ्यन्ते । प्रत्युत्पन्नतो दशतथागतबलानि नोपलभ्यन्ते । अध्वसमतायां दशतथागतबलानि नोपलभ्यन्ते । न सुभूते समतायामतीतोऽध्वोपलभ्यते । नानागतोऽध्वा न प्रत्युत्पन्नोऽध्वोपलभ्यते । समतैव तावत्समतायां नोपलभ्यते । कुतः पुनः समतायामतीतोऽध्वोपलभ्यते । कुतोऽनागतोऽध्वा कुतः प्रत्युत्पन्नोऽध्वोपलभ्यते । पूर्व्वान्ततः सुभूते चत्वारि वैशारद्यानि नोपलभ्यन्ते ।

Nyāyavārtika, Fasc. 2-6 @ /10/ each	Rs. 3	2
Nityācārapaddhati, Fasc. 1-7 @ /10/ each	4	6
Nityācārapradīpa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-3 @ /10/ each Rs.	6	14
Nyāyabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa, Vol. II, Fasc. 1-3 @ /10/ each	1	14
Nyayasarah	2	0
Padumāwati, Fasc. 1-6 @ 2/ each	12	0
Prākrita-Paingalam, Fasc. 1-7 @ /10/ each	4	6
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi English) Fasc. 1-3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Ravisiddhanta Manjari, Fasc. 1	0	10
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraicca Kaha, Fasc. 1-4, @ /10/ each	2	8
Sāṇkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
Six Buddhist Nyaya Tracts	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta, Fasc. 1-2 @ 1-4 each	2	8
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc., 11-25 @ /10/ each	9	6
*Taittirīya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
*Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each	6	4
Tantra Vārtika (English) Fasc. 1-10 @ /1/4	12	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-10; Vol. III, Fasc. 1-2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc. 1-4; Vol. II, Fasc. 1, @ /10/ each	3	2
Tattva Cintamani Didhiti Prakas, Fasc. 1-4, @ /10/ each	2	8
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/	1	14
Tirthacintamoni, Fasc. 1-3, @ /10/ each	1	14
Trikāṇda-Maṇḍanam, Fasc. 1-3 @ /10/	1	14
Tul'si Satsai, Fasc. 1-5 @ /10/	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-	6	0
Vallāla Carita, Fasc. 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc. 1-6 @ /10/	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3-6; Vol. II, Fasc. 1-7; @ /10/ each	6	14
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/	5	10
Ditto Vol. II, Fasc. 2-4, @ 1/4	3	12
Vivādaratnākara, Fasc. 1-7 @ /10/ each	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/	3	12
Yogaśāstra, Fasc. 1-3	3	12

Tibetan Series.

Amarakosah	2	0
Bauddhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each	4	0
Rtogs brjod dpag hkhri S'iṅ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9 @ 1/- each	18	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0

Arabic and Persian Series.

Al-Muqaddasi (English) Vol. I, Fasc. 1-4 @ 1/-	4	0
Āīn-i-Akbarī, Fasc, 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	36	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each	55	8
Akbarnāmah, English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-7; Vol. III, Fasc. 1-2, @ 1/4/ each	21	4
Arabic Bibliography, by Dr. A Sprenger @ /10/	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each	2	0

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

	Rs.	As.
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ...	3	0
Dictionary of Arabic Technical Terms, and Appendix Fasc. 1-21 @ 1/8/ each	31	8
Faras Nama, Fasc. 2	1	0
Farnang-i-Rashidī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Tusi, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each	4	0
Hadiqatu'L, Haqiqat, (Text & Eng.)	3	8
History of Gujarat	1	0
Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngirī, Fasc. 1-3 @ /10/ each	1	14
Isābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1-2 @ 2 each	4	0
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each ...	35	0
Ditto (Eng.) Vol. I, Fasc. 1-2, @ 1/4/ each ...	2	8
Marhamu 'L-Ilali 'L-Mu'Dila, Fasc. 1-2	2	0
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each	9	6
Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- each	16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each...	11	14
Ditto Part 3, Fasc. 1-2 @ 1/- each	2	0
Nukhbatu-l-Fikr, Fasc. 1	0	10
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12 each ...	1	8
Persian and Turki Divans of Bayran Khan, Khan Khanan ...	1	0
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ...	5	0
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each	3	2
Ditto (English) Fasc. 1-5 @ 1/-	5	0
Tadhkira-i-Khushnavīsān	1	0
Tabaquat-i-Nasiri (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārikh-i-Fīrūz-Shāhi of Ziyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian	1	8
Tuzuk-i-Jahāngirī (Eng.) Fasc. 1 @ 1/-	1	0
Wīs o Rāmīn, Fasc. 1-5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/- each 20 0
2. Proceedings of the Asiatic Society from 1875 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

   N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.
4. Journal and Proceedings, N.S., 1905, to date (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25°/ₒ to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each 18 0
9. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

	Rs.	As.
Notice of Sanskrit Manuscripts, Fasc. 1-35 @ 1/- each	35	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

31-10-11.

Books are supplied by V.P.P.